Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. ३५२ - घ

Title रघुवंशः

Author कालिदासः

Extent ८१ Age

Subject काव्यम् अपूर्णम्

© Dharmartha Trust J&K. Digitized by eGangotri

रघुवंशः (काव्यम)

३५२

पत्राणि ८१

८१ पत्राणी

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ३५२-घ
रघुवंश: (काव्यम्)
पत्राणि ८१

© Dharmartha Trust J&K. Digitized by eGangotri

नं.
३५२४
रघुवंश टीका
=१ पत्राणि
कालिदास
[illegible] [illegible]
[illegible]

रघुवंश नवसर्गः ९ दशमः खंडितः

© Dharmartha Trust J&K. Digitized by eGangotri

र॰घु॰ श्रीगणेशाय नमः वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये जगतः पितरौ वंदे पार्वतीपरमेश्वरौ १ क्व सूर्यप्रभवो वंशः क्व चाल्पवि
१ षया मतिः तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरं २ मंदः कवियशःप्रार्थी गमिष्याम्युपहास्यतां प्रांशुलभ्ये फले मोहादुद्बाहुरि
व वामनः ३ अथवा कृतवाग्द्वारे वंशेस्मिन्पूर्वसूरिभिः मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ४ सोहमाजन्मशुद्धानामा
लोदयकर्मणां आसमुद्रक्षितीशानामानाकरथवर्त्मनां ५ यथाविधिहुताग्नीनां यथाकामार्चितार्थिनां यथापराधदंडा १
नां यथाकालप्रबोधिनां ६ त्यागाय संभृतार्थानां सत्याय मितभाषिणां यशसे विजिगीषूणां प्रजायै गृहमेधिनां ७ शैशवेभ्य

© Dharmartha Trust J&K. Digitized by eGangotri

त्मविद्यानांयौवनेविषयैषिणां वार्द्धकेमुनिवृत्तीनांयोगेनांतेतनुत्यजाम् ८ रघूणामन्वयंवक्ष्येतनुवाग्विभवोपिसन् तद्गु
णैः कर्णमागत्यचापलायप्रचोदितः ९ कुलकं सतः श्रोतुमर्हंति सदसद्व्यक्तिहेतवः हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि
वा ॥ १० वैवस्वतोमनुर्नाममाननीयोमनीषिणां आसीन्महीक्षितामाद्यः प्रणवश्छंदसामिव ११ तदन्वयेशुद्धिमतिप्रसू
तः शुद्धिमत्तरः दिलीपइतिराजेंदुरिंदुः क्षीरनिधाविव १२ व्यूढोरस्कोवृषस्कंधः शालप्रांशुर्महाभुजः आत्मकर्मक्षमं
देहंक्षात्रोधर्मइवाश्रितः १३ सर्वातिरिक्तसारेणसर्वतेजोभिभाविना स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वामेरुरिवात्मना १४ आका

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० रसदृशप्रज्ञः प्रज्ञयासादृशागमः आगमैः सदृशारंभः प्रारंभसदृशोदयः १५ भीमकान्तैर्नृपगुणैः स बभूवोपजीविनां अधृष्यश्चाभि
२ गम्यश्च यादोरत्नैरिवार्णवः १६ रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः परम् न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः १७ प्रजानामे
वभूत्यर्थं स ताभ्यो बलिमग्रहीत् सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः १८ सेनापरिच्छदस्तस्य द्वयमेवार्थसाधनम् शा
स्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता १९ तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च फलानुमेयाः प्रारंभाः संस्काराः
प्राक्तना इव २० जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत् २१ ज्ञाने मौनं क्षमा स २

© Dharmartha Trust J&K. Digitized by eGangotri

क्तौत्यागेश्लाघाविपर्ययः गुणागुणानुबंधित्वात्तस्यसप्रसवाइव २२ अनाकृष्टस्यविषयैर्विद्यानांपारदृश्वनः तस्य
धर्मरतेरासीद्वृद्धत्वंजरसाविना २३ प्रजानांविनयाधानाद्रक्षणाद्भरणादपि सपितापितरस्तासांकेवलंजन्महेतवः २४॥
स्थित्यैदंडयतोदंड्यान्परिणेतुःप्रसूतये अप्यर्थकामौतस्यास्तांधर्मएवमनीषिणः २५ दुदोहगांसयज्ञायसस्याय
मघवादिवम् सम्पद्विनिमयेनोभौदधतुर्भुवनद्वयम् २६ नकिलानुययुस्तस्यराजानोरक्षितुर्यशः व्यावृत्तायत्परस्वे
भ्यःश्रुतौतस्करतास्थिता २७ द्वेष्योपिसंमतःशिष्टस्तस्यार्त्तस्ययथौषधं त्याज्योदुष्टःप्रियोप्यासीदंगुलीवोरगक्षता २८

© Dharmartha Trust J&K. Digitized by eGangotri

र घु० ३ तं वेधा विदधे नूनं महाभूतसमाधिना तथाहि सर्वे तस्यासन्परार्थैकफला गुणाः २९ स वेलावप्रवलयां परिखीकृतसागरां ॥
३ अनन्यशासनामुर्वीं शशासैकपुरीमिव ३० तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा पत्नी सुदक्षिणेत्यासीदध्वरस्येव
३ दक्षिणा ३१ कलत्रवंतमात्मानमवरोधमहत्यपि तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ३२ तस्यामात्मानुरूपा ३
यामात्मजन्मसमुत्सुकः विलंबितफलैः कालं स निनाय मनोरथैः ३३ सेहते सुतला भाय स्वभुजादवतारिता तेन धू
र्जगतो गुर्वी सचिवेषु निवेशिता ३४ गंगां भगीरथेनेव पूर्वेषां पावनक्षमां इच्छता संततिं तेन न्यस्तां मे त्रिपुकोशला ३५

© Dharmartha Trust J&K. Digitized by eGangotri

अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया तौ दंपती वसिष्ठस्य गुरोर्जग्मतुराश्रमम् ३६ स्निग्धगंभीरनिर्घोषमेकं
स्यंदनमास्थितौ प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ३७ माभूदाश्रमपीडेति परिमेयपुरःसरौ अनुभावविशेषा
त्तु सेनापरिवृताविव ३८ पवनस्यानकूलत्वात्प्रार्थनासिद्धिशंसिनः रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ३९
सेव्यमानौ सुखस्पर्शैः शालनिर्यासगंधिभिः पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ४० हैयंगवीनमादाय घोषवृद्धा
नुपस्थितान् नामधेयानि पृच्छंतौ वन्यानां मार्गशाखिनां ४१ सरसीष्वरविंदानां वीचिविक्षोभशीतलं आमोदमुपजि

© Dharmartha Trust J&K. Digitized by eGangotri

रघु॰ घ्रंतौ स्वनिश्वासानुकारिणीं ४२ मनोभिरामाः शृण्वंतौ रथनेमिस्वनोन्मुखैः षड्जसंवादिनीः केकाद्विधाभिन्नाः शिखं-
४ डिभिः ४३ परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु मृगद्वंद्वेषु पश्यंतौ स्यंदनाबद्धदृष्टिषु ४४ श्रेणीबंधाद्वितन्वद्भिरस्तं-
भांतोरणस्रजं सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ४५ ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनाम् अमोघाः ४
प्रतिगृह्णंतावर्घ्यानुपदमाशिषः ४६ कुलवं काप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेषयोः हिमनिर्मुक्तयोर्योगे चि-
त्राचंद्रमसोरिव ४७ तत्तद्भूमिपतिः पत्न्यै दर्शयन्प्रियदर्शनः अपि लंघितमध्वानं बुबुधे न बुधोपमः ४८ स दुःप्रा-

© Dharmartha Trust J&K. Digitized by eGangotri

ययशाः प्रापदाश्रमं श्रांतवाहनः सायंसंयमिनस्तस्य महर्षेर्महिषीसखः ४९ वनान्तरादुपावृत्तैः स्कंधासक्तसमि-
त्कुशैः अग्निप्रत्युद्गमात्पूतैः पूर्यमाणमपस्विभिः ५० सेकांते मुनिकन्याभिर्विविक्त्वा ४ आकीर्यमाणमासन्नविधिभिः
समिदाहरैः वैखानसैरध्वष्ण्याग्निप्रत्युद्गमनवत्तिभिः ४ कृततद्दत्तकं विश्वासाय विहंगानामालवालांबुपायिनाम्॥
५१ आतपापायसंक्षिप्तनीवारासु निषादिभिः मृगैर्वर्तितरोमंथमुटजांगणभूमिषु ५२ आकीर्णामृषिपत्नीना
मुटजद्वाररोधिभिः अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ५३ आयुहुताग्निपिशुनैरतिथीनाश्रमोन्मुखान्॥ यु

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० नानंपवनोद्धूतैर्धूमैराहुतिगंधिभिः ५४ इतिकुलकं अथयंतारमादिश्यधुर्यान्विश्रामयेतिसः तामवारोहयत्पत्नींरथा
५ दवततारहच ५५ तस्मैसभ्याःसभार्यायगोप्त्रेगुप्ततमेंद्रियाः। अर्हणामर्हतेचक्रुर्मुनयोनयचक्षुषे ५६ विधेःसायंत
तनस्यांतेसददर्शतपोनिधिं अन्वासीनमरुंधत्यास्वाहयेवहविर्भुजं ५७ तयोर्जगृहतुःपादान्राजाराज्ञीचमागधी
5 तौगुरुर्गुरुपत्नीचप्रीत्याप्रतिननंदतुः ५८ आतिथेयतमातिथ्यंविनीताध्वपरिश्रमं पप्रच्छकुशलंराज्येराज्याश्र ५
ममुनिंमुनिः ५९ अथाथर्वनिधेस्तस्यविजितारिपुरःसरः अर्थ्यामर्थपतिर्वाचमाददेवदतांवरः ६० उपपन्नं

© Dharmartha Trust J&K. Digitized by eGangotri

ननुशिवंसप्तस्वंगेषुयस्यमे दैवीनांमानुषीणांचप्रतिहंतात्वमापदं ६० तवमंत्रकृतोमंत्रैर्दूरात्संशमितारिभिः प्रत्या
दिश्यंतइवमेदृष्टलक्ष्यभिदःशराः ६१ हविरावर्जितंहोतस्त्वयाविधिवदग्निषु वृष्टिर्भवतिसस्यानामवग्रहविशोषि
णां ६२ पुरुषायुषजीविन्योनिरातंकानिरीतयः यन्मदीयाःप्रजास्तस्यहेतुस्त्वद्ब्रह्मवर्चसम् ६३ त्वयैवंचिंत्यमानस्य
गुरुणाब्रह्मयोनिना सानुवंधाःकथंनस्युःसंपदोमेनिरापदः ६४ मत्परंदुर्लभंमत्वानूनमावर्जितंमया पयः
पूर्वैःस्वनिश्वासकवोष्णमुपभुज्यते ६५ किंतुवध्वांतवैतस्यामदृष्टसदृशप्रजम् नमामवतिसद्वीपारत्नसूरपि

© Dharmartha Trust J&K. Digitized by eGangotri

६

रघु० मेदिनी ६७ नूनं मत्तः परं वंश्याः पिंडविछेददर्शिनः न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ६८ सोहमिज्याविशुद्धात्मा प्र
६ जालोपनिमीलितः प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ६९ लोकांतरसुखं पुण्यं तपोदानसमुद्भवं संततिः शु
6 द्धवंश्या हि परत्रेह च शर्मणे ।। ७० तया हीनं विधातर्मां कथं पश्यन्न दूयसे सिक्तं स्वयमिव स्नेहाद्वंध्यमाश्रमपाद
पं ७१ असह्यपीडं भगवन्नृणमंत्यमवेहि मे अरुंतुदमिवालानं नवबद्धस्य दंतिनः ७२ तस्माद्यथा विमुच्येहं ६
संविधातुं तथार्हसि इक्ष्वाकूणां दुरापेर्थे त्वदधीना हि सिद्धयः ७३ इति विज्ञापितो राज्ञा ध्यानस्तिमितलो

© Dharmartha Trust J&K. Digitized by eGangotri

चनः क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ७४ सोपश्यत्प्रणिधानेन संततिस्तंभकारणम् भावितात्मा भुवो भर्तु
रथैनं प्रत्यबोधयत् ७५ पुरा शक्रमुपस्थाय तवोर्वीं प्रतियास्यतः आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ७६
इमां देवीमृतुस्नातां स्मृत्वा सपदि सत्वरः प्रदक्षिणक्रियातीतस्तस्याः कोपमजीजनः ७७ अवजानासि मां यस्मादतस्ते न
भविष्यति मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ७८ स शापो न त्वया राजन्न च सारथिना श्रुतः नदत्याकाशगं
गायाः स्रोतस्युद्दामदिग्गजे ७९ अवेहि तदवज्ञानाद्यत्नायत्तं मनोरथम् प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ८०

© Dharmartha Trust J&K. Digitized by eGangotri

७

रघु० हविषेदीर्घसत्रस्य सा चेदानीं प्रचेतसः भुजंगपिहितद्वारं पातालमधितिष्ठति ८१ सत्वमेकांतरां तस्या मदीयां वत्स
७. मातरं आराधय सपत्नीकः सा वां कामान् विधास्यति ८२ इति वादिन एवास्य होतुराऽऽहुतिसाधनं अनिंद्या नंदिनी नाम
धेनुराववृते वनात् ८३ ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला ॥ बिभ्रती श्वेतरोमांकं संध्येव शशिनं नवं ८४ भु-
वं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि प्रस्नवेनाभिवर्षंती वत्सालोकप्रवर्त्तिना ८५ रजःकणैः खुरोद्धूतैः स्पृशद्भि ७
र्गात्रमंतिकात् तीर्थाभिषेकजां शुद्धिमादधाना महीक्षितः ८६ कुलकं तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः याज्य

© Dharmartha Trust J&K. Digitized by eGangotri

माशंसितावंध्यापार्थिवंपुनरब्रवीत् ८७ अदूरवर्तिनींसिद्धिंराजन्विगणयात्मनः उपस्थितेयंकल्याणीनाम्निकीर्तित
एवयत् ८८ वन्यवृत्तिरिमांशश्वदात्मानुगमनेनगाम् विद्यामभ्यसनेनेवप्रसादयितुमर्हसि ८९ प्रस्थितायांप्रतिष्ठेथाः॥
स्थितायांस्थानमाचरेः निषण्णायांनिषीदास्यांपीताम्भसिपिबेरपः ९० वधूर्भक्तिमतीचैनामर्चितामातपोवनात् प्र
यातांप्रातरन्वेतुसायंप्रत्युद्व्रजेदपि ९१ इत्याप्रसादादस्यास्त्वंपरिचर्यापरोभव अविघ्नमस्तुतेस्थेयाः पितेवधुरिपु
त्रिणाम् ९२ तथेतिप्रतिजग्राहप्रीतिमान्सपरिग्रहः आदेशंदेशकालज्ञः शिष्यः शासितुरानतः ९३ अथप्रदोषेदोषज्ञः

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० ९ संवेशाय विशांपतिं स्तनुः सूनृतवाक्स्रष्टुर्विससर्जोर्जितश्रियम् ९४ सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः कल्पवित्क
ल्पयामास वन्यामेवास्य संविधाम् ९५ अथ राज्ञो धन्यां संविधानेगमविधानं कल्पयामास संविधां अन्यद् अदाने पूजा वि
धावपि निर्दिष्टां कुलपतिनाम पर्णशालामध्यास्य प्रयतपरिग्रहद्वितीयः तच्छिष्याध्ययननिवेदितावसानां संविष्टः
कुशशयने निशां निनाय ९६ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ वशिष्ठाश्रमागमनो नाम प्रथमः सर्गः १ ॥ ९
अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगंधमाल्याम् वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥ १ ॥

तस्याःखुरन्यासपवित्रपांसुमपांसुलानांधुरिकीर्तिनीया मार्गंमनुष्येश्वरधर्मपत्नीश्रुतेरिवार्थंस्मृतिरन्वगछत् २ निव
र्त्यराजादयितांदयालुस्तांसौरभेयींसुरभिर्यशोभिः पयोधरीभूतचतुःसमुद्रांजुगोपगोरूपधरामिवोर्वीं ३ व्रतायतेना
नुचरेणधेनोर्न्यषेधिशेषोप्यनुयायिवर्गः नचान्यतस्तस्यशरीररक्षास्ववीर्यगुप्ताहिमनोःप्रसूतिः ४ आस्वादवद्भिः
कवलैस्तृणानांकंडूयनैर्दंशनिवारणैश्च अव्याहतस्वैरगतैःसतस्याःसम्राट्समाराधनतत्परोभूत् ५ स्थितःस्थिता
मुच्चलितःप्रयातांनिषेदुषीमासनबन्धधीरः जलाभिलाषीजलमाददानांछायेवतांभूपतिरन्वगछत् ६ सन्यस्तचि

© Dharmartha Trust J&K. Digitized by eGangotri

श्री

रघु० ह्नामपिराजलक्ष्मीं तेजोविशेषानुमितांदधानः आसीदनाविष्कृतदानराजिरंतर्मदावस्थइवद्विपेंद्रः ७ लताप्रतानो
द्वि द्ग्रथितैः सकेशैरधिज्यधन्वा विचचारदावम् रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्निवदुष्टसत्वान् ८ विसृष्टपा
१ र्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य उदीरयामासुरिवोन्मदानामालोकशब्दं वयसांविरावैः ९ मरुत्प्रयु
क्ताश्चमरुत्सखाभं तमर्च्यमारादभिवर्त्तमानम् अवाकिरन्बाललताः प्रसूनैराचारलाजैरिवपौरकन्याः १० धनुर्भृतो
ऽप्यस्य दयार्द्रभावमाख्यातमंतःकरणैर्विशंकैः विलोकयंत्यो वपुरापुरक्ष्णां प्रकामविस्तारफलंहरिण्यः ११ सकीचकैर्मारुत श्री

© Dharmartha Trust J&K. Digitized by eGangotri

पूर्णरंध्रैः कूजद्भिरापादितवंशकृत्यं शुश्राव कुंजेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः १२ पृक्तस्तुषारैर्गिरिनि-
र्झराणामनोकहाकंपितपुष्पगंधिः तमातपक्लांतमनातपत्रमाचारपूतं पवनः सिषेवे १३ शशाम वृष्ट्यापि विना द-
वाग्निरासीद्विशेषा फलपुष्पवृद्धिः ऊनं न सत्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने १४ संचारपूतानि दि-
गंतराणि कृत्वा दिनांते निलयाय गंतुं प्रचक्रमे पल्लवरागताम्रा प्रभा पतंगस्य मुनेश्च धेनुः १५ तां देवतापित्रति-
थिक्रियार्थामन्वग्ययौ मध्यमलोकपालः बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना १६ सपल्वलो-

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० त्तीर्णवराहयूथान्यावासवृक्षोन्मुखवर्हिणानि ययौमृगाध्यासितशाद्वलानिश्यामायमानानिवनानिपश्यन् १७ आ
१० पीनंभारोद्वहनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषोनरेंद्रः उभावलंचक्रतुरंचिताभ्यांतपोवनावृत्तिपथंगताभ्यां १८ वसिष्ट
।० धेनोरनुयायिनंतमावर्तमानंवनितावनांतात पपौनिमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिवलोचनाभ्यां ॥ पु
रस्कृतावर्त्मनिपार्थिवेनप्रत्युद्गतापार्थिवधर्मपत्न्या तदंतरेसाविरराजधेनुर्दिनक्षपामध्यगतेवसंध्या २० प्रद १०
क्षिणीकृत्यपयस्विनींतांसुदक्षिणासाक्षतपात्रहस्ता प्रणम्यचानर्चविशालमस्याःशृंगांतरंद्वारमिवार्थसिद्धेः २१ वत्सो

© Dharmartha Trust J&K. Digitized by eGangotri

त्सुकापिस्तिमितासपर्य्यांप्रत्यग्रहीत्सेतिननंदतुस्तौ भक्त्योपपन्नेषुहितद्विधानांप्रसादचिह्नानिपुरःफलानि २२ गुरोःस
दारस्यनिपीड्यपादौसमाप्यसांध्यंचविधिंदिलीपः दोहावसानेपुनरेवदोग्ध्रींभेजेभुजोच्छिन्नरिपुर्निषण्णां २३ ताम
न्तिकन्यस्तबलिप्रदीपामन्वास्यगोप्तागृहिणीसहायः क्रमेणसुप्तामनुसंविवेशसुप्तोत्थितांप्रातरनूदतिष्ठत् २४ इ
त्थंव्रतंपालयतःप्रजार्थंसमंमहिष्यामहनीयकीर्त्तेः सप्तव्यतीयुस्त्रिगुणानितस्यदिनानिदीनोद्धरणोचितस्य २५
अन्येद्युरात्मानुचरस्यभावंजिज्ञासमानामुनिहोमधेनुः गंगाप्रपातांतविरूढशस्पंगौरीगुरोर्गह्वरमाविवेश २६ सादुःप्रध

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० षामनसापिहिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन अलक्षिताभ्युत्पतनोनृपेण प्रसह्यसिंहः किलतांचकर्ष २७ तदीयमाक्रं
११ दितमार्त्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घं रश्मिष्विवादायनगेंद्रसक्तांनिवर्त्तयामासनृपस्यदृष्टिं २८ सपाटलायांग
वितस्थिवांसंधनुर्द्धरःकेसरिणंददर्श अधित्यकायामिवधातुमय्यांलोध्रद्रुमंसानुमतःप्रफुल्लं २९ ततोमृगेंद्रस्य
मृगेंद्रगामीवधायवध्यस्यशरंशरण्यः जाताभिषंगोनृपतिर्निषंगादुद्धर्त्तुमैच्छत्प्रसभोद्धृतारिः ३० वामेतरस्तस्य ११
करःप्रहर्त्तुर्नखप्रभाभूषितकंकपत्रे सक्तांगुलिःसायकपुंखएवचित्रार्पितारंभइवावतस्थे ३१ बाहुप्रतिष्टंभ

© Dharmartha Trust J&K. Digitized by eGangotri

विवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः राजा स्वतेजोभिरदह्यतांतर्भोगीव मंत्रौषधिरुद्धवीर्यः ३२ तमार्यगृह्यं नि
गृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुं विस्माययन्विस्मितमात्मवृत्तौ भूपालसिंहं निजगाद सिंहः ३३ अलं महीपाल त
व श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूर्छति मारुतस्य ३४ कैलासगौरं वृष
मारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठं अवेहि मां किंकरमष्टमूर्तेः कुंभोदरं नाम निकुंभतुल्यं ३५ अमुं पुरः पश्यसि
देवदारुं पुत्रीकृतोसौ वृषभध्वजेन यो हेमकुंभस्तननिस्सृतानां स्कंदस्य मातुः पयसां रसज्ञः ३६ कंडूयमानेन कटं क

© Dharmartha Trust J&K. Digitized by eGangotri

मे काग त

रघु० १२ दाचिद्वन्यद्विपेनोन्मथितात्वगस्य अथैनमद्रेस्तनयाशुशोच सेनान्यमालीढमिवासुरास्त्रैः ३७ तदाप्रभृत्ये
ववनद्विपानांत्रासार्थमस्मिन्नहमद्रिकुक्षौ व्यापारितःशूलभृताविधायसिंहत्वमंगतसत्ववृत्तिः ३८ तस्यालमे
12 षाक्षुधितस्यतृप्त्यैप्रदिष्टकालापरमेश्वरेण। उपस्थिताशोणितपारणामेसुरद्विषश्चांद्रमसीसुधेव सत्वं
निवर्तस्वविहायलज्जांगुरोर्भवान्दर्शितशिष्यभक्तिः शस्त्रेणरक्ष्यंयदशक्यरक्ष्यंनतद्यशःशस्त्रभृतांक्षिणोति ४० १२
इतिप्रगल्भंपुरुषाधिराजोमृगाधिराजस्यवचोनिशम्य प्रत्याहतास्त्रोगिरिशप्रभावादात्मन्यवज्ञांशिथिलीचकार ४१।

© Dharmartha Trust J&K. Digitized by eGangotri

प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वसंगे वितथप्रयत्नः जडीकृतस्त्र्यंबकवीक्षितेन वज्रं मुमुक्षन्निव वज्रपाणिः ४२
संरुद्धचेष्टस्य मृगेन्द्र कामं हास्यं वचस्तद्यदहं विवक्षुः अंतर्गतं (स्थिति प्रत्यवहार हेतो गुरोरपीदं ध) प्राणभृतां
हि वेद सर्वं भवान्भावमतो विधास्ये ४३ मान्यः स मे स्थावरजंगमानां सर्गस्थिति प्रत्यवहारहेतो गुरोरपीदं
धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयं ४४ स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्त्तयितुं यतस्व दिनावसानो
त्सुकबालवत्सा विमुच्यतां धेनुरियं महर्षेः ४५ अथांधकारं गिरिगह्वराणां दंष्ट्रामयूखैः शबलं प्रकुर्वन् भूय

© Dharmartha Trust J&K. Digitized by eGangotri

रघु॰ सभूतेश्वरपार्श्ववर्ती किंचिद्विहस्यार्थपतिं बभाषे ४६ एकातपत्रं जगतः प्रभुत्वं नवं वयः कांतमिदं वपुश्च अल्प
१२ स्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वं ४७ भूतानुकंपा तव चेदियं गौरेका भवेत्स्वस्तिमती त्वदंते॥
जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ४८ अथैकधेनोरपराधचंडाद्गुरोः कृशानुप्रतिमाद्बि
भेषि शक्योस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नीः ४९ तद्रक्ष कल्याणपरंपराणां भोक्तारमूर्जस्
वलमात्मदेहं महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ५० एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेन १२

© Dharmartha Trust J&K. Digitized by eGangotri

नात्मगुहागतेन शिलोच्चयोपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ५१ निशम्य देवानुचरस्य वाचं म-
नुष्यदेवः पुनरप्युवाच धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ५२ क्षतात्किल त्रायत इत्युदग्रः
क्षत्रस्य शब्दो भुवनेषु रूढः राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ५३ कथं नु शक्योनुनयो मह-
र्षेर्विश्राणनाच्चान्यपयस्विनीनां इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयास्यां ५४ सेयं स्वदेहार्पणनि-
ष्क्रयेण न्याय्या मया मोचयितुं भवत्तः न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ५५ भवानपीदं प

© Dharmartha Trust J&K. Digitized by eGangotri

१४

रघु०

१०

रक्षानवैति महान्हि यत्नस्तव देवदारौ स्थातुं नियोक्तुर्नहि शक्यमग्रे विनाश्यरक्ष्यं स्वयमक्षतेन ५६ किमप्यहिंस्यस्त
वचेन्मतोहं यशःशरीरे भवमेदयालुः एकांतविध्वंसिषु मद्विधानां पिंडेष्वनास्था खलु भौतिकेषु ५७ संबंधमाभा
14 षणपूर्वमाहुर्जीनः सनौसंगतयोर्वनांते स्तंपप्रपन्नस्वसः नार्हसि त्वं संबंधिनो मे प्रणायं विहंतुं ५८ तथेति गा
मुक्तवते दिलीपः सद्यः प्रतिष्टंभविमुक्तबाहुः सन्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिंडमिवामिषस्य ५९ तस्मि १४
न्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रं अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ६०

उत्तिष्ठवत्सेत्यमृतायमानंवचोनिशम्योत्थितमुत्थितःसन ददर्शराजाजननीमिवस्वामग्रतःप्रस्नविनी
नसिंहं ॥६२॥ तंविस्मितंधेनुरुवाचसाधोमायांमयोद्भाव्यपरीक्षितोसि ऋषिप्रभावान्मयिनांतकोपिप्रभुःप्रहर्तुंकिमु
तान्यहिंस्राः ॥६३॥ भक्त्यागुरौमय्यनुकंपयाचप्रीतास्मितेपुत्रवरंवृणीष्व नकेवलानांपयसांप्रसूतिमवेहिमांकामदु
घांप्रसन्नां ॥६४॥ ततःसमानीयसमानितार्थीहस्तौस्वहस्तार्जितवीरशब्दः वंशस्यकर्तारमनंतकीर्तिंसुदक्षिणायांतन
यंययाचे ॥६५॥ संतानकामायतथेतिकामंराज्ञेप्रतिश्रुत्यपयस्विनीसा दुग्ध्वापयःपत्रपुटेमदीयंपुत्रोपभुंक्ष्वेतितमादिदेश

© Dharmartha Trust J&K. Digitized by eGangotri

१५

रघु० वत्सस्यहोमार्थविधेश्चशेषंगुरोरनुज्ञामधिगम्यमातः ऊधस्यमिच्छामितवोपभोक्तुंषष्ठांशमुर्व्याइवरक्षितायाः ६६
१५ इत्थंक्षितीशेनवशिष्ठधेनुर्विज्ञापिताप्रीततराबभूव तदन्विताहैमवताच्चकुक्षेःप्रत्याययावाश्रममश्रमेण ६७ त
स्याःप्रसन्नेंदुमुखःप्रसादंगुरुर्नृपाणांगुरवेनिवेद्य प्रहर्षचिन्हानुमितंप्रियायैशशंसवाचापुनरुक्तयेव ६८ सनं
15 दिनीस्तन्यमनिंदितात्मासद्वत्सलोकामर्घास्यःवत्सनिपीतशेषं पपौवशिष्ठेनकृताभ्यनुज्ञःशुभ्रंयशोमूर्तमिवाति १५
तृष्णः ६९ प्रातर्यथोक्तव्रतपारणांते प्रास्थानिकंस्वस्त्ययनंप्रयुज्य तौदंपतीस्वांप्रतिराजधानींप्रस्थापयामासव

© Dharmartha Trust J&K. Digitized by eGangotri

शीवणिक्ष ७० प्रदक्षिणीकृत्य हुतं हुताशं ततमुहोतारमरुंधतींच धेनुंसवत्सांचनृपः प्रतस्थेसन्मंगलोदग्रतर
प्रभावः ७१ श्रोत्राभिरामध्वनिनारथेनसधर्मपत्नीसहितःसहिष्णुः ययावनुद्घातसुखेनमार्गंस्वेनेवपूर्णेनमनोरथेन ७
७२ तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शितांगं नेत्रैःपपुस्तृप्तिमनाप्नुवद्भिर्नवोदयंनाथमिवौषधीनां ७३
पुरंदरश्रीःपुरमुत्पताकंप्रविश्यपौरैरभिनंद्यमानः भुजेभुजंगेन्द्रसमानसारेभूयःसभूमेर्धुरमाससंज ७४ अ
थनयनसमुत्थंज्योतिरत्रेरिव द्यौःसुरसरिदिवतेजोवह्निनिष्ठ्यूतमैशं नरपतिकुलभूत्यैगर्भमाधत्तराज्ञीगुरुभिरभि

© Dharmartha Trust J&K. Digitized by eGangotri

१६

रघु० निर्विष्टं लोकपालानुभावैः ७५ इति श्रीरघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ नंदिनीवराभिगमनो नाम द्विती
१६ यः सर्गः २ अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखं निदानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा
दोहदलक्षणं दधौ १ ततो विशांपतुरनन्यसंततेर्मनोरथं किंचिदिवोदयोन्मुखं अनन्यसौहार्दरसस्य दोहदं प्रि
16 याप्ययेदप्रकृतिप्रियंवदा २ तेपः शरीरसादादसमग्रभूषणा मुखेन सालक्ष्यत लोध्रपांडुना तनुप्रकाशे
नविचेयतारका प्रभातकल्पा शशिनेव शर्वरी ३ मुखेन सा केतकपत्रपांडुना कृशांगयष्टिः परिमेयभूष १६

© Dharmartha Trust J&K. Digitized by eGangotri

ण। स्थिताल्पतारां भगणेंदुमंडलां प्रभातकल्पां रजनीव्यडंवयत् ४ तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्रा
यतृप्तिमाययौ करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलं ५ दिवं मरुत्वानिव भोक्ष्यते मही
दिगंतविश्रांतरथो हि मत्सुत अतोभिलाषेप्रथमं तथाविधे मनो बवंधान्यरसान्विलंघ्य सा ६ न मे ह्रिया शंस
ति किंचिदीप्सितं स्पृहावती वस्तुषु केषु मागधी इति स्म पृच्छत्यनुवेलमादृतः प्रियासखीरुत्तरकोशलेश्वरः ७
उपेत्य सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदाहृतं नहीष्टमस्य त्रिदिवेपि भूपतेरभूदनासाद्यमधिज्यध

© Dharmartha Trust J&K. Digitized by eGangotri

२१

रघु० न्वतः ८ क्रमेण निस्तीर्य्य च दोहदव्यथां प्रचीयमानावयवा रराज सा पुराणपत्रापगमादनंतरं लतेव संनद्धमनो
१७ ज्ञपल्लवा ९ दिनेषु गच्छत्सु नितांतपीवरं तदीयमानीलमुखं स्तनद्वयं तिरश्चकार भ्रमरावलीढयोः सुजातयोः
17 पंकजकोशयोः श्रियं १० दिनेषु गच्छत्सु मधूकपांडुरं तदीयमानीलमुखं स्तनद्वयं समुद्गयोर्वारणदंतकोशयोः
र्विभारकांतिं गवलापिधानयोः ११ निधानगर्भामिव सागरांबरां शमीमिवाभ्यंतरलीनपावकां नदीमिवांतःस १७
लिलां सरस्वतीं नृपः सगर्भां महिषीममन्यत १२ प्रियानुरागस्य मनःसमुन्नतेर्भुजार्जितानां च दिगंतसंपदां यथा

© Dharmartha Trust J&K. Digitized by eGangotri

क्रमं पुंसवनादिकाः क्रियाः श्रुतेश्च धीरः सदृशीर्व्यधत्त सः १३ सुरेंद्रमात्राश्रितगर्भगौरवात्प्रयत्नमुक्तासनया गृहा
गतः तयोपचारांजलिखिन्नहस्तया ननंद पारिप्लवनेत्रया नृपः १४ कुमारभृत्याकुशलैरधिष्ठिते भिषग्भिरा
प्तैरथ गर्भवेश्मनि निरत्ययायप्रसवाय तत्सुषीव भौसमासन्नफलात्क्रियेव सा १५ ग्रहैस्ततः पंचभिरुच्चसंश्र
यैरसूर्यगैः सूचितभाग्यसंपदं असूत पुत्रं समये शची समा त्रिसाधना शक्तिरिवार्थमक्षयं १६ दिशः प्रसेदु
र्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हुतमग्निराददे बभूव सर्वं शुभशंसि तत्क्षणं भवो हि लोकाभ्युदयाय तादृशां १७ अरि

© Dharmartha Trust J&K. Digitized by eGangotri

ष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा निशीथदीपाः सहसा हतत्विषो बभूवुरालेख्यसमर्पिता
इव १८ जनाय शुद्धांतचराय शंसते कुमारजन्मामृतसंमिताक्षरं अदेयमासीत्त्रयमेव भूपतेः शशिप्रभं छत्रमु
भे च चामरे १९ निवातपद्मस्तिमितेन चक्षुषा नृपस्य कांतं पिबतः सुताननं महोदधेः पूर इवेंदुदर्शनाद्गुरुः
प्रहर्षः प्रबभूव नात्मनि २० समीक्ष्य पुत्रस्य पिता चिरात्सुखं निधानकुंभस्य युवेव दुर्गतः मुदा शरीरे प्रबभू १९
व नात्मनः पयोधिरिंदूदयमूर्छितो यथा २१ स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते दिलीपसूनु

© Dharmartha Trust J&K. Digitized by eGangotri

णिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ १९ सुखश्रवा मंगलतूर्यनिस्वनाः प्रमोदनृत्यैः सहवारयोषितां न
केवलं सद्मनि मागधीपतेः पथि व्यजृंभंत दिवौकसामपि २० न संयतस्तस्य बभूव रक्षितुर्विसर्जयेद्यं सुतजन्महृ
षितः ऋणाभिधानात्स्वयमेव केवलं तदा पितॄणां मुमुचे स बंधनात् २१ श्रुतस्य यायादयमंतमर्भकस्तथापरेषां
युधि चेति पार्थिवः अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवं २२ पितुः प्रयत्नात्स समग्रसंप
दः शुभैः शरीरावयवैर्दिने दिने पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचंद्रमाः २३ उमावृषांकौ शरज

© Dharmartha Trust J&K. Digitized by eGangotri

१५

रघु० न्मनायथायथाजयंतेनशचीपुरंदरौ तथानृपः साचसुतेनमागधीननंदतुस्तत्सदृशेनतत्समौ २७
१५ रथांगनाम्नोरिवभाववंधनंवभूवयत्प्रेमपरस्पराश्रयं विभक्तमप्येकसुतेनतत्तयोः परस्परस्योपरिपर्यची
यत २८ उवाचधात्र्याप्रथमोदितंवचोययौतदीयामवलंब्यचांगुलिं अभूच्चनम्रःप्रणिपातशिक्षयापितु
१९ र्मुदंतेनततानसोर्भकः २९ तमंकमारोप्यशरीरयोगजैःसुखैर्निषिंचंतमिवामृतंत्वचि उपांतसम्मीलितलो १५
चनोनृपश्चिरात्सुतस्पर्शरसज्ञतांययौ ३० अमंस्तचानेनपरार्ध्यजन्मनास्थितेरभेत्तास्थितिमंतमन्वयं स्व

© Dharmartha Trust J&K. Digitized by eGangotri

मूर्त्तिभेदेनगुणाग्र्यवर्त्तिनापतिःप्रजानामिवसर्ग्गमात्मनः ३१ सवृत्तचूडश्चलकाकपक्षकैरमात्यपुत्रैःसव
योभिरन्वितः लिपेर्यथावद्ग्रहणेनवाङ्मयंनदीमुखेनेवसमुद्रमाविशत् ३२ अथोपनीतंविधिवद्विपश्चि
तोविनिन्युरेनंगुरवोगुरुप्रियं अवंध्ययत्नाश्चबभूवुरत्रते क्रियाहिवस्तूपहिताप्रसीदति ३३ धियःसम
ग्रैःसगुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः ततारविद्याःपवनातिपातिभिर्दिशोहरिद्भिर्हरितामि
वेश्वरः ३४ त्वचंसमेध्यांपरिधायरौरवीमशिक्षतास्त्रंपितुरेवमंत्रवित् नकेवलंतद्गुरुरेकपार्थिवःक्षिताव

© Dharmartha Trust J&K. Digitized by eGangotri

१०

रघु० भूदेकधनुर्धरोपिसः ३५ पदाभियात्रोद्धतरेणुधूसरैर्महीक्षितांक्यंजितशक्तिमौलिभिः उपोढपादस्तमुपोढयौ
१० वनंनिवेशयामासपितायथाविधिः महोक्षतांवत्सतरःस्पृशन्निवद्विपेंद्रभावंकलभःश्रयन्निव रघुःक्र
१० मायौवनभिन्नशैशवःपुपोषगांभीर्यमनोहरंवपुः ३६ अथास्यगोदानविधेरनंतरंविवाहदीक्षांनिरव
र्तयद्गुरुः नरेंद्रकन्यास्तमवाप्यसत्पतिंतमोनुदंदक्षसुताइवाबभुः ३७ युवायुगव्यायतबाहुरंसलः १०
कपाटवक्षाःपरिणद्धकंधरः वपुःप्रकर्षादजयद्गुरुंरघुस्तथापिनीचैर्विनयाददृश्यत ३८ ततःप्रजानांचिर

© Dharmartha Trust J&K. Digitized by eGangotri

मात्मनाध्यस्तां नितांतगुर्वीं लघयिष्यता धुरं निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक ३९
नरेंद्रमूलायतनादनंतरं तदास्पदं श्रीर्युवराजसंज्ञितं अगच्छदंशेन गुणाभिलाषिणी नवावतारं कमलादिवोत्पलं ४०
विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव बभूव तेनातितरां सुदुःसहः कटप्रभेदेन करीव पार्थि
वः ४१ नियुज्य तं होमतुरंगरक्षणे धनुर्धरं राजसुतैरनुद्रुतं अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामपविघ्नमाप
सः ४२ अतः परं तेन मखाय यज्वना तुरंगमुत्सृष्टमनर्गलं पुनः धनुर्भृतामग्रत एव रक्षिणां जहार शक्रः किल गू

© Dharmartha Trust J&K. Digitized by eGangotri

२१

रघु० ऽविग्रहः ४३ विषादलुप्तप्रतिपत्तिविस्मितं कुमारसैन्यं सपदि स्थितं च तत् वसिष्ठधेनुश्च यदृच्छयागता श्रुतप्रभा-
२१ वाददृशेऽथ नंदिनी ४४ तदंगनिस्यंदजलेन लोचने प्रमृज्य पुण्येन पुरस्कृतः सतां अतींद्रियेष्वप्युपपन्नदर्शनो-
२१ बभूव भावेषु दिलीपनंदनः ४५ स पूर्वतः पर्वतपक्षशातिनं ददर्श देवं नरदेवसंभवः पुनः पुनः सूतनिषिद्धचाप-
लं हरंतमश्वं रथरश्मिसंयतं ४६ शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः अवोचदेनं ग- २१
गनस्पृशा रघुः स्वरेण धीरेण निवर्त्तयन्निव ४७ मखांशभाजां प्रथमो मनीषिभिस्त्वमेव देवेंद्र सदा निगद्यसे अ-

© Dharmartha Trust J&K. Digitized by eGangotri

जस्रदीक्षाप्रयतस्यमद्गुरोः क्रियाविघातायकथंप्रवर्त्तसे ४८ त्रिलोकनाथेनसदामखद्विषस्त्वयानियम्याननु
दिव्यचक्षुषा सचेत्स्वयंकर्मसुधर्मचारिणांत्वमंतरायोभवसिच्युतोविधि ४९ तदंगमग्र्यंमघवन्महाक्रतोरमुंतु
रंगंप्रतिमोक्तुमर्हसि पथःश्रुतेर्दर्शयितारईश्वरामलीमसामाददतेनपद्धतिं ५० इतिप्रगल्भंरघुणासमीरितं
वचोनिशम्याधिपतिर्दिवौकसां निवर्त्तयामासरथंसविस्मयः प्रचक्रमेचप्रतिवक्तुमुत्तरं ५१ यदात्थराज
न्यकुमारतत्तथायशस्तुरक्ष्यंपरतोयशोधनैः जगत्प्रकाशंतदशेषमिज्ययाभवद्गुरुर्लंघयितुंममोद्यतः ५२ ह

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० रिर्यथैकः पुरुषोत्तमो मतो महेश्वरस्त्र्यंबक एव नापरः तथाविदुर्मांमुनयः शतक्रतुद्वितियगामी नहि शब्द एष
११ नः ५३ अतोयमश्वः कपिलानुकारिणा पितुस्त्वदीयस्य मयापहारितः अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां
सगरस्य संततेः ५४ ततः प्रहस्याह पुनः पुरंदरं व्यपेतभीर्भूतिपुरंदरात्मजः गृहाण शस्त्रं यदि सर्ग एष ते न खल्व
निर्जित्य रघुं कृती भवान् ५५ स एवमुक्त्वा मघवन्तमुन्मुखः करिष्यमाणः सशरं शरासनं अतिष्ठदालीढविशे ११
षशोभिना वपुः प्रकर्षेण विडंबितेश्वरः ५६ रघोरवष्टंभमयेन पत्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः नवां

© Dharmartha Trust J&K. Digitized by eGangotri

वृद्धानीकमुहूर्त्तलांछनेन धनुष्यमोघं समधत्त सायकं ५७ दिलीपसूनोः स तु बाहुअंतरं प्रविश्य भीमासुरशोणितो
चितः पपावनास्वादितपूर्वमाशुगः कुतूहलेनेव मनुष्यशोणितं ५८ हरेः कुमारोपि कुमारविक्रमः सुरद्वि
पास्फालनकर्कशांगुलौ भुजे शचीपत्रलताक्रियोचिते स्वनामचिह्नं निचखान सायकं ५९ जहार हौरैचा
न्येन मयूरपत्रिणा शरेण शक्रस्य महाशनिध्वजं चुकोप तस्मै स भृशं सुरश्रियः प्रसह्य केशव्यपरोपणादिव
६० तयोरुपांतस्थितद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः बभूव युद्धं तुमुलं जयैषिणोरधोमुखैरूर्ध्वमुखै
सि

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० श्रसायकैः ६१ अतिप्रबंधप्रहितास्त्रवृष्टिभिस्तमाश्रयं दुःप्रसहस्य तेजसः शशाक निर्वापयितुं न वासवः स्वतश्च्यु
९३ तंवन्हिमिवाद्भिरंबुदः ६२ ततः प्रकोष्ठे हरिचंदनांकिते प्रमथ्यमानार्णवभीमनादिनीं रघुः शशांकार्द्धमुखेन प-
२३ त्रिणा शरासनज्यामलुनाद्बिडौजसः ६३ स चापमुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्विषः महीध्र
पक्षव्यपरोपणोचितं स्फुरत्प्रभामंडलमस्त्रमाददे ६४ रघुर्भृशं वक्षसि तेन ताडितः पपात भूमौ सह सैनिकाश्रु ९३
भिः निमेषमात्रादवधूय च व्यथां सहोत्थितः सैनिकहर्षनिस्वनैः ६५ तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे

© Dharmartha Trust J&K. Digitized by eGangotri

चिरमस्य तस्थुषः तुतोष वीर्यातिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्निधीयते ॥ ६६ ॥ अकुंठमद्रिष्वपि सारवत्तया
न मे त्वदन्येन विसोढुमायुधं अवेहि मां प्रीतमृते तुरंगमात्किमिच्छसीति स्फुटमाह वासवः ॥ ६७ ॥ ततो निषंगादसम
ग्रमुद्धृतं सुवर्णपुंखद्युतिरंजितांगुलिः दिलीपसूनुः प्रतिसंहरन् विभुं प्रियंवदः प्रत्यवदत्सुरेश्वरं ॥ ६८ ॥ अ
मोच्यमश्वं यदि मन्यसे प्रभो ततः समाप्ते विधिनैव कर्मणि अजस्रदीक्षाप्रयतः स मद्गुरुः क्रतोरशेषेण फले
न युज्यतां ॥ ६९ ॥ यथा च वृत्तांतमिमं सदोगतस्त्रिलोचनैकांशतया दुरासदः तवैव संदेशहराद्विशांपतिः शृणो

२४

रघु० तिदेवेशंतथाविधीयतां ७ तथेतिकामंप्रतिशुश्रुवान्रघोर्यथागतंमातलिसारथिर्ययौ नृपस्यनातिप्रमनाः
२४ सदोगृहंसुदक्षिणासूनुरपिन्यवर्त्तत ७१ तमभ्यनंदत्प्रथमंप्रबोधितःप्रजेश्वरःशासनहारिणाहरेः परामृशन्ह
र्षजडेनपाणिनातदीयमंगंकुलिशव्रणांकितं ७२ इतिक्षितीशोनवतिंनवाधिकांमहाक्रतूनांमहनीयशास २४
२४ नः समारुरुक्षुर्दिवमायुषःक्षयेततानसोपानपरंपरामिव ७३ अथसविषयव्यावृत्तात्मायथाविधिसू
नवेनृपतिककुदंदत्वायूनेसितातपवारणं मुनिवनतरुछायांदेव्यातयासहशिश्रियेगलितवयसामि

© Dharmartha Trust J&K. Digitized by eGangotri

ह्वाकूणामिदंहिकुलव्रतं ॥ इतिश्रीरघुवंशेमहाकाव्येकालिदासकृतौकअमप्रवेशोनामतृतीयःसर्गः ॥०॥
सराज्यंगुरुणादत्तंप्रतिपद्याधिकंबभौ दिनांतेनिहितंतेजःसवित्रेवहुताशनः १ न्यस्तशस्त्रंदिलीपंचतंच व
सुस्थवुषांप्रभुं राज्ञामुद्धतनाराचेहृदिशल्यमिवार्प्पितं २ पुरुहूतध्वजस्येवतस्योन्नयनपंक्तयः नवाभ्यु
त्थानदर्शिन्योननंदुःसुप्रजःप्रजाः ३ छायामंडललक्ष्येणतमलक्ष्याकिलस्वयंपद्मापद्मातपत्रेणभेजेसा
म्राज्यदीक्षितं ४ परिकल्पितसान्निध्याकालेकालेचवंदिषु स्तुत्यंस्तुतिभिरर्थ्याभिरुपतस्थेसरस्वती ५ मनु

© Dharmartha Trust J&K. Digitized by eGangotri

२५

रघु० प्रभृतिभिर्मोल्यैरनुमायचपिराजभिः तस्याप्यनन्यपूर्वैवतस्मिन्नासीद्वसुंधरा ६ संहिसर्वस्यलोकस्ययुक्त
२५ दंडतयामनः आददेनातिशीतोष्णोनभस्वानिवदक्षिणः ७ दिलीपानंतरंराज्येतंनिशम्यप्रतिष्ठितं पूर्वंप्रधू
पितोराज्ञांहृदयेग्निरिवोत्थितः ८ सममेवसमाक्रांतंद्वयंद्विरदगामिना तेनसिंहासनंपित्र्यमखिलंचारि
25 मंडलं ९ नयविद्भिर्नवेराज्ञिसदसच्चोपदर्शितं पूर्वमेवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः १० मंदोत्कंठाःकृता २५
स्तेनगुणाधिकतयागुरौ फलेनसहकारस्यपुष्पोद्गमइवप्रजाः ११ पंचानामपिभूतानामुत्कर्षंपुपुषुर्गु

© Dharmartha Trust J&K. Digitized by eGangotri

॥: नवेतस्मिन्महीपालसर्वंनवमिवाभवत् १२ यथाप्रल्हादनाच्चंद्रः प्रतापात्तपनोयथा तथैवसोभूदन्व
र्थोराजाप्रकृतिरंजनात् १३ कामंकर्णांतविश्रांतेविशालेतस्यलोचने चक्षुष्मत्तातुशास्त्रेणसूक्ष्मकार्यार्थद
र्शिना १४ लब्धप्रशमनस्वास्थ्यमथैनंसमुपस्थिता पार्थिवश्रीर्द्वितीयेवशरत्पंकजलक्षणा ॥ १५ निर्वृ
ष्टलघुभिर्मेघैर्मुक्तवर्त्मासुदुःसहः प्रतापस्तस्यभानोश्चयुगपद्व्यानशेदिशः १६ अधिज्यमायुधंकर्तुंस
मयोयंरघोरिति स्वंधनुःशंकितेनेवसंजह्रेशतमन्युना १७ वार्षिकंसंजहारेंद्रोधनुर्जैत्रंरघुर्दधौ प्रजार्थ

© Dharmartha Trust J&K. Digitized by eGangotri

२६

रघु० साधनेतौहिपर्य्यायोद्यतकार्म्मुकौ १८ पुंडरीकातपत्रस्तंविकसत्काशचामरः ऋतुर्विडंबयामास नपुनःप्रापत
२६ च्छ्रियं॥१९ प्रसादसुमुखेतस्मिंश्चंद्रेचविशदप्रभे तदाचचुक्ष्मतांप्रीतिरासीत्समरसाद्वयोः २० हंसश्रेणीषुतारा
26 सुकुमुद्वत्सुचवारिषु विभूतयस्तदीयानांपर्य्यस्तायशसामिव २१ इक्षुछायानिषादिन्यस्तस्यगोप्तुर्गुणोदयं॥
आकुमारकथोद्घातंशालिगोप्योजगुर्यशः २२ प्रससादोदयादंभःकुंभयोनेर्महौजसः रघोस्त्वभिभवाशंकि २६
चुक्षुभेद्विषतांमनः २३ मदोदग्राःककुद्मंतःसरितांकूलमुद्रुजाः लीलाखेलमनुप्रापुर्महोक्षास्तस्यविक्रमं

© Dharmartha Trust J&K. Digitized by eGangotri

२४ सरितः कुर्वती गाधाः पथश्चाश्यानकर्द्दमान् यात्रायै प्रेरयामास तं शक्तेः प्रथमं शरत् २५ प्रसवैः सप्तपर्णा
नां मदगंधिभिराहताः असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः २६ सम्यक्तस्मेहुतो वह्निर्वाजिनीराजनाविधौ प्रद
क्षिणार्च्चिर्व्याजेन हस्तेनेव जयं ददौ २७ स गुप्तमूलप्रत्यंतः शुद्धपार्ष्णिरयान्वितः षड्विधं बलमादाय प्रतस्थे
दिग्जिगीषया २८ अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः पृषतैर्मंदरोद्धूतैः क्षीरोर्मय इवाच्युतं २९ स
ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा अहितानिलोद्धूतैः तर्जयन्निव केतुभिः ३० रजोभिः स्यंदनोद्धूतैर्गजैः

© Dharmartha Trust J&K. Digitized by eGangotri

२७

रघु० जैश्चघनसंनिभैः भुवस्तलमिव व्योमकुर्वन्व्योमेव भूतलं ३१ मरुपृष्ठान्युदंभांसि नाव्याः सुप्रतरा नदीः वि
२७ पिनानिप्रकाशानिशक्तिमत्वाच्चकारसः ३२ प्रतापोग्रेततः शब्दः परागस्तदनंतरं ययौपश्चाद्रथानीकंचतुस्कं
धेवसाचमूः ३३ पुरोगैः कलुषास्तस्य सहप्रस्थायिभिः कृताः पश्चात्प्रयायिभिः पंकाश्चक्रिरे मार्गनिम्नगाः ३४ २७
२७ सः सेनांमहतीं कर्षन्पूर्वसागरगामिनीं बभौ हरजटाभ्रष्टां गंगामिव भगीरथः ३५ त्याजितैः फलमुत्खातैः
भग्नैश्च बहुधा नृपैः तस्यासीदुल्वणो मार्गः पादपैरिव दंतिनः ३६ पौरस्त्यानेवमाक्रामंस्तांस्तांजनपदान्

© Dharmartha Trust J&K. Digitized by eGangotri

जयि आयतालीवनश्यामम् उपकंठं महोदधेः ३७ अनम्राणां समुद्धर्तुस्तस्मात्सिंधुरयादिव आत्मासंरक्षितः सुह्मैर्वृ
त्तिमाश्रित्य वैतसीं ३८ वंगानुत्खाय तरसा नेता नौसाधनोद्यतान् निचखान जयस्तंभान् गंगास्रोतोंतरेषु सः ३९ आ
पादपद्मप्रणताः कलमा इव ते रघुं फलैः संवर्द्धयामासुरुत्खातप्रतिरोपिताः ४० स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरद
सेतुभिः उत्कलादेशितपथः कलिंगाभिमुखं ययौ ४१ स प्रतापं महेंद्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् अंकुशं द्विर
दस्येव यंता गंभीरवेदिनः ४२ प्रतिजग्राह कालिंगस्तमस्त्रैर्गजसाधनः पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः

© Dharmartha Trust J&K. Digitized by eGangotri

२२

रघु० ४३ द्विषां विसह्य काकुत्स्थस्तत्र नाराचदुर्दिनं सन्मंगलस्नातइव प्रतिपेदे जयश्रियं ४४ वायैरस्यभूयतवाहानां
२२ चरतां गात्रशिंजितैः बृहद्भिः पवनोद्धूतराजतालीवनध्वनिः वायव्यास्त्रविनीर्ह्रतात्पक्षाविद्धान्महोदधेः गजा
२४ नीकान्सकालिंगातार्क्ष्यः सर्पमिवाददे ४५ तांबूलीनां दलैस्तत्ररचितापानभूमयः नारिकेरासवं योधाः शात्र
वंच पपुर्यशः ४६ गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीं ४७ ततो वे २९
लातटेनैव फलवत्पूगमालिना अगस्त्याचरितामाशामनाशास्यजयो ययौ ४८ स सैन्यपरिभोगेन गजदानसु

© Dharmartha Trust J&K. Digitized by eGangotri

गंधिना कावेरीं सरितां पत्युः शंकनीयामिवाकरोत् ४९ भयोत्सृष्टविभूषाणां तेन केरलयोषितां अलकेषु चम
रेणुश्चूर्णप्रतिनिधीकृतः ५० बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः हारीतोत्सृष्टमारीचा मलयाद्रेरुपत्यकाः
५१ ससंजुरश्वक्षुण्णानामेलानामुत्पतिष्णवः तुल्यगंधिषु मत्तेभकटेषु फलरेणवः ५२ आजानेयखुरक्षुण्णमाप
कैलासात्तत्र संभवं व्यानशे सपदि व्योम कीटशाको विलं रजः ५३ भोगिवेष्टनमार्गेषु चंदनानां समर्पितं ना
स्रंसत्करिणां ग्रैवं त्रिपदीछेदिनामपि ५४ दिशि मंदायते तेजो दक्षिणस्यां रवेरपि तस्यामेव रघोः पांड्याः प्र

© Dharmartha Trust J&K. Digitized by eGangotri

श्री

रघु० तापंनविषेहिरे ५५ ताम्रापर्णीसमेतस्यमुक्तासारंमहोदधेः तेनिपत्यददुस्तस्मैयशःस्वमिवसंचितं ५६ सनिर्वि-
श्री श्ययथाकामंतटेष्वालीनचंदनौस्तनाविवदिशस्तस्याः शैलौमलयदर्दुरौ ५७ असह्यविक्रमःसह्यंदूरमुक्तमुद
न्वतानितंबमिवमेदिन्याःस्रस्तांशुकमलंघयत् ५८ तस्यानीकैर्विसर्पद्भिरपरांतजयोद्यतैः रामास्त्रोत्सारितोप्या
29 सीत्सह्यलग्नइवार्णवः ५९ मुरलामारुतोद्धूतमगमत्कैतकंरजः तद्योधवारवाणानामयत्नपटवासतां ६० श्री
खर्जूरीस्कंधनद्धानांमदोद्गारसुगंधिषु कटेषुकरिणांपेतुःपुन्नागेभ्यःशिलीमुखाः ६१ अवकाशंकिलोदन्वा

© Dharmartha Trust J&K. Digitized by eGangotri

न्रामायाभ्यर्थितोददौ अपरांतमहीपालव्याजेनरघवेकरं ६२ मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणं त्रिकूटमे
वतत्रोच्चैर्जयस्तंभंचकारसः ६३ अभ्यभूयतवाहानांचरतांगात्रसिंजितैः मर्मरैःपवनोद्धूतराजतालीवनध्वनिः
६४ पारसीकांस्ततोजेतुंप्रतस्थेस्थलवर्त्मना इंद्रियाख्यानिवरिपूंस्तत्वज्ञानेनसंयमी ६५ यवनीमुखपद्मानां
सेहेमधुमदंनसः बालातपमिवाब्जानामकालजलदोदयः ६६ संग्रामस्तुमुलस्तस्यपाश्चात्यैरश्वसाधनैः शार्ङ्ग
कूजितविज्ञेयप्रतियोधेरजस्यभूत् ६७ भल्लापवर्जितैस्तेषांशिरोभिःश्मश्रुलैर्महीं तस्तारशरघाव्याप्तैःसक्षौद्रपटलै

© Dharmartha Trust J&K. Digitized by eGangotri

३०

रघु० रिव इद अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः प्रणिपातप्रतीकारः संरंभो हि महात्मनां ६९ विनयंते स्म तद्योधा मधुभि-
३० र्विजयश्रमं आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ७० ततः प्रतस्थे कौवेरीं भास्वानिव रघुर्दिशं शरैरुस्रैरिवोदीच्यानु-
३० द्धरिष्यन्रसानिव ७१ विनीताध्वश्रमास्तस्य वंक्षुतीरविचेष्टनैः दुधुवुर्वाजिनः स्कंधान्लग्नकुंकुमकेशरान् ७२ जितानज-
य्यस्तानेवह्नःतारयपुरःसरान् महार्णवमिवौर्वाग्निः प्रविवेशोत्तरापथं ७३ तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमं ॥ ३०
कपोलपाटलादेशि बभूव रघुचेष्टितं ७४ कांबोजाः समरे वीर्यं तस्य सोढुमनीश्वराः गजालानपरिक्लिष्टैरक्षोडैः-

© Dharmartha Trust J&K. Digitized by eGangotri

सार्द्धमानताः ७५ तेषां सदश्वभूयिष्ठास्तुंगा द्रविणराशयः विविशुस्तं विशांनाथमुदन्वंतमिवापगाः ७६ ततो गौरी
गुरुं शैलमारुरोहाश्वसाधनः वर्द्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ७७ शशंस तुल्यसत्वानां सैन्यघोषेप्यसंभ्रमं ॥
गुहासयानां सिंहानां परिवृत्यावलोकितं ७८ भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः गंगासीकरिणो मार्गे म
रुतस्तं सिषेविरे ७९ विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः दृषदो वासितोत्संगा निषण्णमृगनाभिभिः
८० सरलासक्तमातंगग्रैवेयोपचितत्विषः आसन्नौषधयो नेतुर्नक्तमस्नेहदीपिकाः ८१ तस्योत्सृष्टनिवासेषु

© Dharmartha Trust J&K. Digitized by eGangotri

३१

रघु० कंठरज्जुक्षतत्वचः गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ८२ तत्र युद्धं रघोर्घोरं पार्वतीयैर्गणैरभूत् नाराचक्षेप
३१ णीयाश्मनिष्पेषोत्पतितानलं ८३ शरैरुत्सवसंकेतान्स कृत्वा विरतोत्सवान् जयोदाहरणं बाह्वोर्गापयामास किं
नरान् ८४ परस्परस्य विज्ञातस्तेषूपायनपाणिषु राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ८५ तत्राक्षोभ्यं यश ३१
३१ शोराशिं निवेश्यावरुरोह सः पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियं ८६ चकंपे तीर्णलौहित्ये तस्मिन्प्राग्ज्योति
षेश्वरः तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ८७ न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनं रथवर्त्मरजोप्यस्य

© Dharmartha Trust J&K. Digitized by eGangotri

कुतएवं यताकिंनौ ॥७८॥ तमीशः कामरूपाणामत्याखंडलविक्रमं भेजेभिन्नकटैर्नागैरन्यानुपरुरोधयैः ॥७९॥ का
मरूपेश्वरस्तस्य हेमपीठाधिदेवतां रत्नपुष्पोपहारेणच्छायामानर्च्चपादयोः ॥८०॥ इतिजित्वादिशोजिष्णुर्न्यवर्त्त
तरथोद्धतं रजोविश्रामयन्राज्ञांछत्रशून्येषुमौलिषु ॥८१॥ सःविश्वजितमारभेक्रतुंसर्वस्वदक्षिणां आदानंहिवि
सर्गायसतांवारिमुचामिव ॥८२॥ सत्रातेसचिवसखःपुरस्क्रियाभिर्गुर्वीभिःशमितपराजयव्यलीकान् काकुत्स्थश्चि
रविरहोत्सुकावरोधान्राजन्यान्स्वपुरनिवृत्तयेनुमेने ॥८३॥ तेलेखाध्वजकुलिशात्रचिन्हंसंम्राजश्चरणयुगंप्रसादल

© Dharmartha Trust J&K. Digitized by eGangotri

३२

स्थं प्रस्थानप्रणितिभिरंगुल्लीषुचक्रुर्मौलिस्रक्च्युतमकरंदरेणुगौरं स्थियज्ञांतेतमभ्यथाभिषेकयूतंसत्का
रघु० रैःशमितपराजयव्यलीकाः आमंत्र्योत्सुकवनितानितह्निमस्थाःस्वानिस्वान्यवनिभुजःपुराणिजग्मुः ॥५ ८८
३२ तिश्रीरघुवंशेमहाकाव्येकालिदासकृतौदिग्विजयोनामचतुर्थसर्गः ॥ तमध्वरेविश्वजितिक्षितीशंनि:
निःशेषविश्राणितकोशजातं उपात्तविद्योगुरुदक्षिणार्थीकौत्सःप्रपेदेवरतंतुशिष्यः १ समस्मृयवीत ३२
लिरावपत्वात्पात्रेनिधायार्घ्यमनर्घशीलः श्रुतप्रकाशंयशसाप्रकाशःप्रत्युज्जगामातिथिमातिथेयः २

© Dharmartha Trust J&K. Digitized by eGangotri

तमर्च्चयित्वाविधिवद्विधिज्ञस्तपोधनंमानधनाग्रयायी कृतांजलिःकृत्यविचारदक्षोविशांपतिर्विष्टरभा
जमारात् ३ अप्यग्रणीर्मंत्रकृतामृषीणांकुशाग्रबुद्धेकुशलीगुरुस्तेयतस्त्वयाज्ञानमशेषमाप्तंचैतन्यमुग्रादि
दीद्धितेन ४ कायेनवाचामनसाचतस्मैयद्धजिष्णोधैर्यविपर्ययाय आपाद्यतेनव्ययमंतरायैःकच्चिन्म
हर्षेस्त्रिविधंतपस्तत् ५ आधारबंधप्रमुखैःप्रयत्नैःसंवर्द्धितानांसुतनिर्विशेषं कच्चिन्नवाय्वादिरुपप्लवोवःश्र
मच्छिदामाश्रमपादपानां ६ क्रियानिमित्तेष्वपिवत्सलत्वादभग्नकामामुनिभिःकुशेषु तदंकशय्याच्युतनाभिना॰

© Dharmartha Trust J&K. Digitized by eGangotri

३२

रघु० लोकश्चिरंगोनामनघाप्रसूतिः ७ निर्वर्त्यतेयैर्नियमाभिषेकोयतोनिवापांजलयः पितृणां तान्युंछषष्ठांकि

३२ तसैकतानिशिवानियत्तीर्थजलानिकच्चित् ८ नीवारपाकादिकडंगरीयैरामृश्यतेजानपदैर्नकच्चित् कालो

पपन्नातिभागधेयंवन्यंशरीरस्थितिसाधनंवः ९ अपिप्रसन्नेनमहर्षिणात्वंसम्यग्विनीयानुमतोगृहाय

33 ॥ कालोह्ययंसंक्रमितुंद्वितीयंसर्वोपकारक्षममाश्रमंते १० तवार्हतोनाभिगमेनतृप्तंमनोनियोगक्रिययोत्सुकंमे ३२

अप्याज्ञयाशासितुरात्मनोवाप्राप्तोसिसंभावयितुंवनान्मां ११ इत्यर्घ्यपात्रानुमितव्ययस्यरघोरुदारामपि

© Dharmartha Trust J&K. Digitized by eGangotri

गं निशम्य स्वार्थोपपत्तिं प्रति दुर्वलाशस्तमित्यवोचद्वरतंतुशिष्यः १२ सर्वत्र नो वार्त्तमवेहि राजन्नाथे कुतस्त्वय्यशुभं
प्रजानां सूर्ये तपत्याव[illegible]णाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रं १३ भक्तिः प्रतीक्ष्येषु कुलोचिता ते पूर्वान्महाभाग
तयातिशेषे व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति मे विषादः १४ शरीरमात्रेण नरेंद्र तिष्ठन्नाभासि
तीर्थप्रतिपादितर्द्धिः आरण्यकोपात्तफलप्रसूतिः स्तंवेन नीवार इवावशिष्टः १५ स्थाने भवानेकनराधिपस्स
न्नकिंचनत्वं मखजं व्यनक्ति पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः १६ त्वदन्यतस्ताव

© Dharmartha Trust J&K. Digitized by eGangotri

३४

रघु० दत्तन्मया कार्य्यो गुर्वर्थमाहर्तुमहं यतिष्ये स्वस्त्यस्तु ते निर्गलितांबुगर्भं शरद्घनं नार्द्दति चातकोपि १७ एतावदुक्त्वा
३४ प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य किंवस्तु विद्वन्गुरवे प्रदेयं त्वया कियद्वेति तमन्वयुंक्त वाम् १८
35 ततो यथावद्विहिताध्वराय तस्मै स्मयावेशविवर्जिताय वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचच
क्षे १९ अवाप्तविद्येन मया महर्षिर्विज्ञापितोभूद्गुरुदक्षिणायै स मे चिरायास्खलितोपचारां तां भक्तिमेवाग ३४
णयत्पुरस्तात् २० निर्बंधसंजातरुषार्थकार्श्यमचिंतयित्वा गुरुणाहमुक्तः वित्तस्य विद्यापरिसंख्यया मे को

© Dharmartha Trust J&K. Digitized by eGangotri

दीप्सतलोदशचाहरेति २१ सोहंसपर्याविधिभाजनेनमत्वाभवंतंप्रभुशब्दशेषं अभ्युत्सहेसंप्रतिनोपरोद्धुम
न्येतरत्वाछ्रुतनिःक्रयस्य २२ इत्थंद्विजेनद्विजराजकांतिरावेदितोवेदविदांवरेण। एनोनिवृत्तेंद्रियवृत्तिरेनं
जगाददभूयोजगदेकनाथः २३ गुर्वर्थमर्थीश्रुतपारदृश्वारघोःसकाशादनवाप्यकामं गतोवदान्यांतरमित्य
यंमेमाभूत्परीवादनवावतारः २४ सत्वंप्रशस्तेमहितेमदीयेवसंश्चतुर्थोग्निरिवाग्न्यगारे द्वित्राण्यहान्यर्ह
सिसोढुमर्हन्यावद्यतेसाधयितुंत्वदर्थं २५ तथेतितस्यावितथंप्रतीतःप्रत्यग्रहीत्संगिरमग्रजन्मा गामात्तसारां

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० रघुरप्यवेत्यानिष्क्रष्टुमर्थं चकमे कुबेरात् २६ वसिष्ठमंत्रोक्षणजप्रभावादुदन्वदाकाशमहीधरेषु मरुत्सखस्येव बला
हकस्य गतिर्विजघ्ने न हि तद्रथस्य २७ अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भं सामंतसंभावनयैव
३५ धीरः कैलासनाथं तरसा जिगीषुः २८ प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः कोशगृहे नियुक्ताः हिरण्मयीं कोश
35 गृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः २९ तं भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभियास्यमानात् दिदेश कौत्सा ३५
य समस्तमेव शृंगं सुमेरोरिव वज्रभिन्नं ३० जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनंद्यसत्वौ गुरुप्रदेया

© Dharmartha Trust J&K. Digitized by eGangotri

धिकनिस्पृहोर्थी नृपोर्थिकामादधिकप्रदश्च ३१ अथोष्ट्रवामीशतहारितार्थं प्रजेश्वरं प्रीतमना मनीषी स्पृशन्
करेणानतपूर्वकायं संप्रस्थितो वाचमुवाच कौत्सः ३२ किमत्र चित्रं यदि कामसूर्भूर्वृत्ते स्थितस्याधिपतेः प्रजा
नां अचिंत्यनीयः सुतवप्रभावो मनीषितं द्यौरपि येन दुग्धा ३३ आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्य
धिजग्मुषस्ते पुत्रं लभस्वात्मगुणानुरूपं भवंतमीड्यं भवतः पितेव ३४ इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रती
याय गुरोः सकाशं राजापि लेभे सुतमाशु तस्मादालोकमर्कादिव जीवलोकः ३५ ब्राह्मे मुहूर्ते किल तस्य देवी

३६

रघु ३६ 36

कुमारकल्पंसुसुवेकुमारं अतःपिताब्रह्मणएवनाम्नातमात्मजन्मानमजंचकारः ३६ रूपंतदोजस्वितदेववी
र्यंतथैवनैसर्गिकमुन्नतत्वं नकारणात्स्वाद्बिभिदेकुमारःप्रवर्त्तितोदीपइवप्रदीपात ३७ उपात्तविद्यंविधिव
द्गुरुभ्यःतंयौवनोद्भेदविशेषकांतं श्रीर्गंतुकामापिगुरोरनुज्ञांधीरेवकन्यापितुराचकांक्षे ३८ अथेश्वरेणक्रथ
कैशिकानांस्वयंवरार्थंस्वसुरिंदुमत्याः आप्तःकुमारानयनोत्सुकेनभोजेनदूतोरघवेविसृष्टः ३९ तंश्लाघ्यसंबं ३६
धमसौविचिंत्यदारक्रियायोग्यदशंचपुत्रं प्रस्थापयामाससैन्यमेतमृद्धांविदर्भाधिपराजधानी ४० तस्योप

© Dharmartha Trust J&K. Digitized by eGangotri

कार्योरचितोपचारा वन्यांतरा राजपदं पदाभिः मार्गे निवासा मनुजेंद्रसूनोर्बभूवुरुद्यानविहारकल्पाः ४१ सन
र्मदारोधसि सीकरार्द्रैर्मरुद्भिरानर्तितनक्तमाले निवेशयामास विलंघिताध्वा क्लांतं रजोधूसरकेतु सैन्यं ४२ अ
थोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्राक्सूचितांतःसलिलप्रवेशः निर्धौतदानामलगंडभित्तिर्वन्यः सरित्तो गज उन्ममज्ज
४३ निःशेषविक्षालितधातुनापि वप्रक्रियामृक्षवतस्तटेषु नीलोर्ध्वरेखाशबलेन शंसन्दंतद्वयेनाश्मविकुं
ठितेन ४४ संहारविक्षेपलघुक्रियेन हस्तेन तीराभिमुखः सशब्दं बभौ स भिंदन्बृहतस्तरंगान्वार्यर्गलाभंग इव

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० प्रपन्नः युग्म ४५ शैलोपमः शैवलमंजरीणांजालानिकर्षन्नुरसासपश्चात् पूर्वंतदुत्पीडितवारिराशिः सरित्प्रवाह
३० स्तटमुत्ससर्प ४६ तस्यैकनागस्यकपोलभित्त्योर्जलावगाहक्षणमात्रशांता वन्येतरानेकपदर्शनेन पुनर्दिदीपे
मददुर्दिनश्री ४७ सपच्छदक्षीरकटुप्रवाहमसह्यमाघ्रायमदंतदीयं विलंघिताधोरणतीव्रयत्नाः सेनागजेंद्रा
31 विमुखाबभूवुः ४८ सछिन्नबंधद्रुतयुग्यशून्यंभग्नाक्षपर्यस्तरथंक्षणेन रामापरित्राणविहस्तयोधंसेना ३२
निवेशंचपलंचकार ४९ तमापतंतंनृपतेरवध्योवन्यः करीतिश्रुतवान्कुमारः निवर्त्तयिष्यन्विशिखेनकुंभेज

© Dharmartha Trust J&K. Digitized by eGangotri

घानात्यायतकृष्टशार्ङ्गः ५० सविद्धमात्रः किलनागरूपमुत्सृज्यतद्विस्मितसैन्यदृष्टः स्फुरत्प्रभामंडलमध्य
वर्त्तिकांतंवपुर्व्योमचरंप्रपेदे ५१ अथप्रभावोपनतैःकुमारंकल्पद्रुमोत्थैरवकीर्यपुष्पैः उवाचवाग्मीदश
नप्रभाभिःसंवर्द्धितोरस्थलतारहारः ५२ मतंगशापादवलेपमूलादवाप्तवानस्मिमतं गजत्वं अवेहि
गंधर्वपतेस्तनूजंप्रियंवदंमांप्रियदर्शनस्य ५३ सचानुनीतःप्रणतेनपश्चान्मयामह र्षिर्मृदुतामगच्छ
त् उष्णत्वमग्न्यातपसंप्रयोगात्सैत्यंहियत्साप्रकृतिर्जलस्य ५४ इक्ष्वाकुवंशप्रभवोयदातेभेत्स्यत्यजःकुंभमयोमु

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० ३८

खेन संयोज्य सेखेन वपूर्महिम्ना तदेत्य वोचत्स तपोनिधिर्म्मां ५५ संमोचितः सत्ववता त्वयाहं शापाच्चिरप्रा
र्थितदर्शनेन प्रतिप्रियं चेद्भवतो न कुर्यां वृथा हि मे स्यात्स्वपदोपलब्धिः ५६ प्रस्वापन नं नाम सखे मम
मास्त्रं प्रयोगसंहारविभक्तमंत्रं गांधर्वमादत्स्व यतः प्रयोक्तुर्न्न चारिहिंसा विजयश्च हस्ते ५७ अलं ३८
ह्रिया मां प्रति यन्मुहूर्त्तं दयापरोभूः प्रहरन्नपि त्वं तस्मादुपच्छंदयति प्रयोज्यं मयि त्वया न प्रतिषेधरौक्ष्यं ५८
तथेत्युपस्पृश्य पयः पवित्रं सोमोद्भवायाः सरितो नृसोमः उदङ्मुखः सोस्त्रविदस्त्रमंत्रं जग्राह तस्मान्निगृहीतशापात् ५९

© Dharmartha Trust J&K. Digitized by eGangotri

समुद्रः२

एवंतयोरध्वनिदैवयोगादासेदुषोस्सख्यमचिंत्यहेतुः एकोययौचैत्ररथप्रदेशान्सौराज्यरम्यानपरोविदर्भान्
६० तंतस्थिवांसंनगरोपकंठेतदागमारूढगुरुप्रहर्षः प्रत्युज्जगामक्रथकैशिकेंद्रश्चंद्रंप्रवृद्धोर्मिरिवोर्मि
माली ६१ प्रवेश्यचैनंपुरमग्रयायीनीचैस्तथोपाचरदर्पितश्रीः मेनेयथातत्रजनःसमेतोवैद
र्भमागंतुमङ्गगृहेशं ६२ तस्याधिकारिपुरुषैःप्रणतैःप्रदिष्टांप्राग्द्वारवेदिविनिवेसितहेमकुंभां रम्यांरघुप्र
तिनिधिःसनवोपकार्यांबाल्यात्परामिवदशांमदनोध्युवास ६३ तत्रस्वयंवरसमाहृतराजलोकंकन्यालला

© Dharmartha Trust J&K. Digitized by eGangotri

रघु ३७ मकमनीयमजस्य लिप्सोः भावावबोधकलुषा दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव: ॥६४॥ तं कर्ण
भूषणनिपीडितपीवरांसं शय्योत्तरच्छदविमर्दकृशांगरागं वैतालिकाः ललितबंधमनोहराभिः प्राबोधयन्नुष
सि वाग्भिरुदारवाचः ॥६५॥ रात्रिर्गता मतिमतां वर मुंच शय्यां धात्रा द्विधैव ननु धूर्जगतो विभक्ता तामेकतस्तव
बिभर्ति गुरुर्विनिद्रस्तस्या भवानपरधुर्यपदावलंबी ॥६६॥ निद्रावशेन भवताप्यनवेक्षमाणा पर्युत्सुकत्वमबलापि ३७
निशि खंडितेव लक्ष्मीर्विनोदयति येन दिगंतलंबी सोपि त्वदाननरुचिं विजहाति चंद्रः ॥६७॥ तद्वल्गुना युग

पटुस्मितचितेन तावत्सख्यः परस्परतुलामधिरोहतां द्वे प्रस्यंदमानपरुषेतरतारमंतश्चक्षुस्तव प्रचलितभ्रमरं च
पद्मं ६८ वृन्तश्लथं हरति पुष्पमनोकहानां संसृज्यते सरसिजैररुणांशुभिन्नैः स्वाभाविकं परगुणेन विभातवायुः
सौरभ्यमीप्सुरिव ते मुखमारुतस्य ६९ ताम्रोदरेषु पतितं तरुपल्लवेषु निर्धौतहारगुडिकाविशदं हिमांभः सं
लक्ष्यते दशनचंद्रिकयानुविद्धं बिंबाधरस्य परभागमिव स्मितं ते ७० यावत्प्रतापनिधिराक्रमते न भानुरह्ना
य तावदरुणेन तमो निरस्तं आयोधनाग्रसरतां त्वयि वीर याते किं वा रिपूंस्तव गुरुः स्वयमुच्छिनत्ति ७१ शय्यांज

© Dharmartha Trust J&K. Digitized by eGangotri

८०

रघु० हत्युभयपक्षविनीतनिद्राः स्तंवेरमा मुखरशृंखलकर्षिणस्ते येषां विभांति तरुणारुणरागयोगाद्भिन्नाद्रिगै
५० रिकतटा इव दंतकोशाः ७२ दीर्घेष्वमी नियमिताः पटमंडपेषु निद्रां विहाय वनजाक्ष वनायुजास्ते वक्त्रोष्म
णा मलिनयंति पुरोगतानि लेह्यानि सैन्धवशिलाशकलानि वाहाः ७३ भवति विरलभक्तिर्म्लानपुष्पोपहा
रः स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्तामनुवदति शुकस्ते मंजु ५०
वाक्पंजरस्थः ७४ इति विरचितवाग्भिर्वंदिपुत्रैः कुमारः सपदि विहतनिद्रस्तल्पमुज्झांचकार मदपटुनि

© Dharmartha Trust J&K. Digitized by eGangotri

नङ्गिबोधितो राजहंसैः सुरगज इव गांगं सैकतं सुप्रतीकः ७५ अथविधिमवसाप्य शास्त्रदृष्टं दिवसमुखोचितमं
चीताक्षिपक्ष्मा कुशलविरचितानुरूपवेषः क्षितिपसमाजमगात्स्वयंवरस्थं ७६ इतिश्री रघुवंशे महाकाव्ये का
लिदासकृतौ स्वयंवराभिगमनो नाम पंचमः सर्गः ॥५ स तत्र मंचेषु मनोज्ञवेषां सिंहासनस्थानुपचारवत्सु वै
मानिकानां मरुतामपश्यदाकृष्टलीलान्नरलोकपालान् १ स तत्र मंचेषु विमानकल्पेष्वाकल्पसंमूर्छितरूपशोभा
न् सिंहासनस्थान्नृपतीनपश्यद्यूपान्प्रशस्तानिव हेमवेदीन् २ रतेर्गृहीतानुनयेन कामं प्रत्यर्पितस्वांगमिवेश्व

© Dharmartha Trust J&K. Digitized by eGangotri

४१

रघु० रेण काकुत्स्थमालोकयतां नृपाणां मनो बभूवेंदुमतीनिराशं ३ वैदर्भनिर्दिष्टमथो कुमारः क्लृप्तेन सोपानपथेन मंचं
४१ शिलाविभंगैर्मृगराजशावस्तुंगं नगोत्संगमिवारुरोह ४ परार्ध्यवर्णास्तरणोपपन्नमासेदिवान्रत्नवदासनं सः ।।
४१ भूयिष्ठमासीदुपमेयकान्तिर्मयूरपृष्ठाश्रयिणा गुहेन ५ तासु श्रिया राजपरंपरासु प्रभाविशेषोदयदुर्निरीक्ष्यः
।। सहस्रधामा व्यरुचद्विभक्तः पयोमुचां पंक्तिषु विद्युतेव ६ तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये ४१
रराज धाम्ना रघुसूनुरेकः कल्पद्रुमाणामिव पारिजातः ७ नेत्रव्रजाः पौरजनस्य तस्मिन्विहाय सर्वान्नृपतीन्नि

© Dharmartha Trust J&K. Digitized by eGangotri

पेतुः मदोत्कटेरेचितपुष्पवृक्षागंधद्विपेवन्यइवद्विरेफाः ८ अथस्तुतेवंदिभिरन्वयज्ञैः सोमार्कवंश्येनरदेवलो
केसंचारितेचागुरुसारयोनौधूपेशिखावासितकेतुमाले ९ पुरोपकंठोपवनाश्रयाणांशिखंडिनामुद्धतनृ
त्यहेतौ अथ्मातशंखेपरितोदिगंतान्तूर्यस्वनेवर्कतिमंगलार्थे १० मनुष्यवाह्यंचतुरंगयानमध्यास्यकन्या
परिवारसोभि विवेशमंचांतरराजमार्गंपतिंवराक्लृप्तविवाहवेषा ११ तस्मिन्विधानातिशयेविधातुःकन्या
मयेनेत्रसहस्रलक्ष्ये निपेतुरंतःकरणैर्नरेंद्रादेहैस्थिताःकेवलमासनेषु १२ तांप्रत्यभिव्यक्तमनोरथानांमही

© Dharmartha Trust J&K. Digitized by eGangotri

५२

रघु पतीनां प्रणयाग्रदूत्यः प्रवालशोभा इव पादपानां शृंगारचेष्टा विविधा बभूवुः १३ कश्चित्कराभ्यामुपगूढनाल
५२ मालोलपत्राभिहतद्विरेफं रजोभिरन्तःपरिवेषबन्धि लीलारविंदं भ्रमयां चकार १४ विस्रस्तमंसादपरो वि
लासी केयूरकोटिस्खलितजातसंगं प्रालंबमुत्कृष्य यथाप्रदेशं निनाय साचीकृतचारुवक्त्रः १५ आकुंचिताग्रां ५२
गुलिना ततोन्यः किंचित्समावर्जितनेत्रशोभः रत्नांशुसंपृक्तनखप्रभेन पादेन हैमं विलिलेख पीठं १६ निवे
श्य वामं भुजमासनार्धे तत्संनिवेशादधिकोन्नतांसः कश्चिद्विवृत्तत्रिकभिन्नहारः सुहृत्समाभाषणतत्परोभूत् १७

© Dharmartha Trust J&K. Digitized by eGangotri

विलासिनीविभ्रमदन्तपत्रमापांडुरंकेतकगर्भमन्यः प्रियानितंबोचितसन्निवेशैर्विपाटयामास युवा नखा
ग्रैः १८ कुशेशयाताम्रतलेन कश्चित्करेण रेखाध्वजलांछनेन रत्नांगुलीयप्रभयानुविद्धानुदीरयामास सली
लमक्षान् १९ कश्चिद्यथाभागमवस्थितेपि स्वसन्निवेशाद्व्यतिलंघतीव रत्नांशुगर्भांगुलिरंध्रमेकं व्यापार या
मास करं किरीटे २० ततो नृपाणां श्रुतवृत्तवंशा पुंवत्प्रगल्भा प्रतिहाररक्षी प्राक्संनिकर्षं मगधेश्वरस्य नी
त्वा कुमारीमवदत्सुनंदा २१ असौ शरण्यः शरणोन्मुखानामगाधसत्वो मगधप्रतिष्ठः राजा प्रजारंजनलब्ध

© Dharmartha Trust J&K. Digitized by eGangotri

५२

रघु० वर्णाः परंतपो नाम यथार्थनामा २२ कामं नृपाः संति सहस्रशोन्ये राजन्वतीमाहुरनेन भूमिं नक्षत्रताराग्रहसंकुला
५३ पि ज्योतिष्मती चंद्रमसैव रात्रिः २३ क्रियाप्रबंधादयमध्वराणामजस्रमाहूतसहस्रनेत्रः शच्याश्चिरं पा
63 ण्डुकपोललंबान्मंदारशून्यानलकांश्चकार २४ अनेन चेदिच्छसि गृह्यमाणं पाणिं वरेण्येन कुरु प्रवेशे प्रा
सादवातायनसंश्रितानां नेत्रोत्सवं पुष्पपुरांगनानां २५ एवं तयोक्ते तमवेक्ष्य किंचिद्विस्रंसिदूर्वांकमधूकमाला ऋ ५३
जुप्रणामक्रिययैव तन्वी प्रत्यादिदेशैनमभाषमाणा २६ तां सैव वेत्रग्रहणे नियुक्ता राजांतरं राजसुतां निनाय॥

© Dharmartha Trust J&K. Digitized by eGangotri

समीरणोत्थेव तरंगलेखा पद्मांतरं मानसराजहंसीं २७ जगाद चैनामयमंगनाथः सुरांगनाप्रार्थितयौवनश्रीः वि
नीतनागः किल सूत्रकारैरैंद्रं पदं भूमिगतोपि भुंक्ते २८ अनेन पर्यासयताश्रुबिंदून्मुक्ताफलस्थूलतमान्स्तनेषु प्रत्य
र्पिताः शत्रुविलासिनीनामाक्षिप्य सूत्रेण विनैव हाराः २९ निसर्गभिन्नास्पदमेकसंस्थमस्मिन्द्वयं श्रीश्च सरस्वती च
कांत्या गिरा सूनृतया च योग्या त्वमेव कल्याणि तयोस्तृतीया ३० अथांगराजादवतार्य चक्षुर्याहीति जन्यामवदत्कुमा
री नासौ न काम्यो न च वेद सम्यग्द्रष्टुं न सा भिन्नरुचिर्हि लोकः ३१ ततः परं दुःप्रसहं द्विषद्भिर्नृपं नियुक्ता प्रतिहारभू

© Dharmartha Trust J&K. Digitized by eGangotri

४४

स्यु०

५६ मैा निदर्शयामास विशेषदृश्यमिंदुं नवोत्थानमिवेंदुमत्यै ३२ अवंतिनाथो ऽयमुदग्रबाहुर्विशालवक्षास्तनु

५५ वृत्तमध्यः आरोप्य चक्रभ्रममुष्णतेजास्त्वष्ट्रेव यत्नोल्लिखितो विभाति ३३ अस्य प्रयाणेषु समग्रशक्तेरग्रेस

रैः वाजिभिरुत्थितानि कुर्वंति सामंतशिखामणीनां प्रभाप्ररोहास्तमयं रजांसि ३४ असौ महाकालनिकेतनस्य व

सन्नदूरे किल चंद्रमौलेः तमिस्रपक्षेऽपि सह प्रियाभिर्ज्योत्स्नावतो निर्विशति प्रदोषान् ३५ अनेन यूना सह पा ४४

र्थिवेन रंभोरु कच्चिन्मनसो रुचिस्ते शिप्रातरंगानिलकंपितासु विहर्तुमुद्यानपरंपरासु ३६ तस्मिन्नभिद्यो

© Dharmartha Trust J&K. Digitized by eGangotri

तितवंधुपद्मेप्रतापसंशोषितशत्रुपंके ववंधमानोत्तमसौकुमार्यात्कुमुद्वतीभानुमतीवभावं ३७ तामग्रतस्तामर
सांतराभामनूपराजस्यगुणैरनूनां विधायसृष्टिंललितांविधातुर्जगादभूयःसुदतींसुनंदा ३८ संग्रामनिर्विष्टसहस्र
वाहुरष्टादशद्वीपनिखातयूपः अनन्यसाधारणराजशब्दोवभूवयोगीकिलकार्त्तवीर्यः ३९ अकार्यचिंतासम
कालमेवप्रादुर्भवंश्चापधरःपुरस्तात् अंतःशरीरेष्वपियःप्रजानांप्रत्यादिदेशाविनयंविनेता ४० ज्यावंधनिष्पंद
भुजेनयस्यविनिःश्वसद्वक्त्रपरंपरेण कारागृहेनिर्जितवासवेनलंकेश्वरेणोषितमाप्रसादात् ४१ तस्यान्वयेभू

© Dharmartha Trust J&K. Digitized by eGangotri

६१

रघु. पतिरंगज्ञातः प्रतीपइत्यागमवृद्धसेवी येनश्रियः संश्रयदोषरूढं स्वभावलोलेत्ययशः प्रमृष्टं ४२ आयो
६५ धनेकृष्णगतिंसहायमवाप्ययः क्षत्रियकालरात्रेः धारांशितांरामपरश्वधस्यसंभावयत्युत्पलपत्रसारां
६५ ४३ अस्यांकलक्ष्मीर्भवदीर्घबाहोर्माहिष्मतीवप्रनितंबकांची प्रासादजालैर्जलवेणिरम्यांरेवांयदिप्रेक्षितुमस् ६५
तिकामः ४४ तस्याः प्रकामंप्रियदर्शनोपिनसक्षितीशोरुचयेबभूव शरत्प्रमृष्टांबुधरोपरोधः शशीवपर्या
प्तकलोनलिन्याः ४५ साशूरसेनाधिपतिंसुषेणमुद्दिश्यलोकांतरगीतकीर्त्तिं आचारशुद्धोभयवंशदीपंशुद्धांत

© Dharmartha Trust J&K. Digitized by eGangotri

रक्षाजगदेकुमारी ४६ नीपान्वयः पार्थिव एष यज्वा गुणैर्यमाश्रित्य परस्परेण सिद्धाश्रमं शांतमिवेत्य स
त्वैर्नैसर्गिकोप्युत्ससृजे विरोधः ४७ यस्यात्मगेहे नयनाभिरामा कांतिर्हिमांशोरिव संनिविष्टा हर्म्याग्रसंरूढ
तृणांकुरेषु तेजोविसह्यं रिपुमंदिरेषु ४८ यस्यावरोधस्तनचंदनानां प्रक्षालनाद्वारिविहारकाले कलिंद
कन्यामथुरागतापि गंगोर्मिसंसक्तजलेव भाति ४९ भीतेन ताक्षीत्किल कालियेन मणिं विसृष्टं यमुनौकसा य
ः वक्षस्थलव्यापिरुचं दधानः सकौस्तुभं ह्रेपयतीव विष्णुं ५० संभाव्य भर्तारममुं युवानं मृदुप्रवालोत्तरपुष्प

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० शय्ये वृंदावने चैत्ररथादनूने निर्विश्यतां सुंदरि यौवनश्रीः ५१ अध्यास्य चांभःपृषतोक्षितानि शैलेयगंधानि
५६ शिलातलानि कलापिनां प्रावृषि पश्य नृत्यं कांतासु गोवर्द्धनकंदरासु ५२ नृपं तमावर्तमनोज्ञनाभिः सा व्यत्यगा
दन्यवधूर्भवित्री महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव ५३ अथांगदाश्लिष्टभुजं भुजिष्या हेमांग ५६
दंनाम कलिंगनाथं आसेदुषीं सादितशत्रुपक्षं बालामबालेंदुमुखीं बभाषे ५४ असौ महेंद्राद्रिसमानसारः प
तिर्महेंद्रस्य महोदधेश्च यस्य क्षरत्सैन्यगजच्छलेन यात्रासु यातीव पुरो महेंद्रः ५५ ज्याघातरेखे सुभुजो भुजा

© Dharmartha Trust J&K. Digitized by eGangotri

भ्यां विभर्त्ति यश्चापमभृतां पुरोगः रिपुश्रियः सांजनबाष्पसिक्तैर्बन्दीकृता याश्च वपुष्मतीश्च ५६ रणाभ्यमित्रीणात
या प्रकाशः सरोसमज्यानिकाघो भुजाभ्यां विस्फुरल्लतैरलौरि पुविक्रमाप्तेर्निर्वाणमार्ग विवभौ विभर्त्ति ५७ तमात्मनः स
म्रनिसंनिविष्टं मंदध्वनित्याजितयामतूर्यैः प्रासाद वातायनहंसपंक्तिः प्रबोधयत्पर्णवाणएव सुप्तं ५८ क्रमेण सांद्रैर्वि
हरांबुरासे सीरे खुताली वनमर्मरेषु द्वीपान्तरानीतलवंगपुष्पैरपाकृतस्वेदलवा मरुद्भिः ५९ प्रलोभितामत्यपि र
मन्ततभूर्विदर्भराजावरजा तयैव तस्मादपावर्त्तत दूरकृष्णामीत्येव लक्ष्मीः प्रतिकूलदैवात ६० अथाधिगम्योरगा

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० राजकल्पंपतिंपुरस्योरगापूर्वनाम्नः सुमापतिंविक्रमनिर्जितारिमिदंसुदासुदंतीजगाद ५८ अथोरगाख्यस्यपुरस्य
६० नाथंदौवारिकीदेवसरूपमेत्य इतश्चकोराक्षिविलोकयेतिपूर्वानुशिष्टानिजगादभोज्यां ५९ पांड्योयमंसार्पित
६१ लंबहारः क्लृप्तांगरागोहरिचंदनेन आभातिबालातपरक्तसानुः सनिर्झरोद्गारः इवाद्रिराजः ६० विंध्यस्यसंस्त
भयितामहाद्रेर्निःशेषपीतोज्झितसिंधुराजः प्रीत्याश्वमेधावभृथार्द्रमूर्तेः सौस्नातिकोयस्यभवत्यगस्त्यः ६१॥ ६०
अस्त्रंहरादाप्तवतादुरापंयेनेन्द्रलोकावजयायदृप्तः पुराजनस्थानविमर्दशंकीसंधायलंकाधिपतिःप्रतस्थे

६५ अनेन पाणौ विधिवद्गृहीते महाकुलीनेन महीव गुर्वी रत्नानुविद्धार्णवमेखलाया दिशः सपत्नी भव दक्षि-
णस्याः ६६ तांबूलवल्लीपरिणद्धपूगास्वेलालतालिंगितचंदनासु तमालपत्रास्तरणासु शश्वत्प्रसीद रंतुं मल
यस्थलीषु ६७ इंदीवरश्यामतनुर्नृपोयं त्वं रोचनागौरशरीरयष्टिः अन्योन्यशोभापरिवृद्धये वां योगस्तडि
त्तोयदयोरिवास्तु ६८ स्वसुर्विदर्भाधिपतेस्तदीयो लेभेंतरं चेतसि नोपदेशः दिवाकरादर्शनबद्धकोशे नक्ष
त्रनाथांशुरिवारविंदे ६९ संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा नरेंद्रमार्गाट्ट इव प्रपेदे

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० विवर्णभावं स स भूमिपालः ७० तस्यां रघोः सूनुरुपस्थितायां वृणीत मां नेति समाकुलोभूत् वामेतरः संशयमस्य बा
५८ हुः केयूरबंधोच्छ्वसितैर्नुनोद ७१ तं प्राप्य सर्वावयवानवद्यं व्यावर्त्ततान्योपगमात्कुमारी नहि प्रफुल्लं सहका
रमेत्य वृक्षांतरं कांक्षति षट्पदाली ७२ तस्मिन् समावेशितचित्तवृत्तिमिन्दुप्रभामिंदुमतीमवेक्ष्य प्रचक्रमे व
५८ क्तुमनुक्रमज्ञा सविस्तरं वाक्यमिदं सुनंदा ७३ इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहितलक्षणोभूत् ५८
काकुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोशलेन्द्राः ७४ महेंद्रमास्थाय महोक्षरूपं यः संयति प्राप्त

© Dharmartha Trust J&K. Digitized by eGangotri

पिनाकिलीलः चकार बाणैरसुरांगनानां गंडस्थलीः प्रोषितपत्रलेखाः ७५ ऐरावतस्फालनविश्लथं यः संघट्ट
यन्नंगदमंगदेन उपेयुषः स्वामपि मूर्त्तिमग्र्यामर्द्धासनं गोत्रभिदोधितस्थौ ७६ जातः कुले तस्य किलोरुकीर्त्तिः कुलप्र
दीपो नृपतिर्दिलीपः अतिष्ठदेकोनशतक्रतुत्वे शक्राभ्यसूयाविनिवृत्तये यः ७७ यस्मिन्महीं शासति कामिनीनां
निद्रां विहारार्द्धपथे गतानां वातो पि नास्रंशयदंशुकानि को लंबयेदाभरणाय हस्तं ७८ पुत्रो रघुस्तस्य पदं प्रशा
स्ति महाक्रतोर्विश्वजितः प्रयोक्ता चतुर्दिगावर्जितसंभृतां यो मृत्पात्रशेषामकरोद्विभूतिम् ७९ आरूढमद्रीनुद

© Dharmartha Trust J&K. Digitized by eGangotri

धर्म

रघु० धर्म

धीरन्वतीर्णे भुजंगमानां वसतिं प्रविष्टे ऊर्ध्वं गतं यस्य न चानुबंधि यशः परिच्छेत्तुमियत्तयालं ८० असौ कुमारस्त-
मजातस्त्रिविष्टपस्येव पतिं जयंतः गुर्वीं धुरं यो भुवनस्य पित्रा धुर्येण दम्यः सदृशीं बिभर्ति ८१ कुलेन कांत्या व-
यसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु कांचनेन ८२ ततः सुनंदाव-
चनावसाने लज्जामृदूकृत्य नरेन्द्रकन्या दृष्ट्या प्रसादामलया कुमारं प्रत्यग्रहीत्संवरणस्रजेव ८३ सा यूनि तस्मि-
न्नभिलाषबंधं शशाक शालीनतया न वक्तुं रोमांचलक्ष्येण स गात्रयष्टिं भित्त्वा निराक्रामदरालकेश्याः ८४ सा चूर्णगौ-

धर्म

© Dharmartha Trust J&K. Digitized by eGangotri

ॱ रघुनंदनस्य धात्रीकराभ्यां करभोपमोरुः आसंजयामास यथाप्रदेशं कंठे गुणं मूर्त्तमिवानुरागं ८५ तयास्रजमं
गलपुष्पमय्या विशालवक्षस्थललंवयासः अमंस्त कंठार्प्पितवाहुपाशां विदर्भराजावरजां वरेण्यः ८६ शशिनमुप
गतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जन्हुकन्यावतीर्णा इति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटु नृपा
णामेकवाक्यं विवव्रुः ८७ प्रमुदितवरपक्षमेकतस्तत् क्षितिपतिमंडलमन्यतो विमानं उषसि सर इव प्रफुल्लपद्मं
कुमुदवनं प्रतिपन्ननिमासीत ८८ इति श्रीरघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ स्वयंवरवर्णनो नाम षष्ठः सर्गः ६ ॐ

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० अथोपयन्त्रासदृशेनयुक्तांस्कंदेनसाक्षादिवदेवसेनां स्वसारमादायवैदर्भराजः पुरप्रवेशाभिमुखोवभूव १ सेना
५० निवेशान्पृथिवीक्षितोपिजग्मुर्विभातग्रहमन्दभासः भोज्यांप्रतिव्यर्थमनोरथत्वाद्रूपेषुवेषेषुचसाभ्यसूयाः २
५० सान्निध्ययोगात्किलतत्रशच्याः स्वयंवरक्षोभकृतामभावः काकुत्स्थमुद्दिश्यसमत्सरोपिशशामतेनक्षितिपाललो ६०
कः ३ तावत्प्रकीर्णाभिनवोपचारमिंद्रायुधद्योतिततोरणांकं वरः सवध्वासहराजमार्गंप्रापध्वजच्छायनिवारि
तोष्णं ४ ततस्तदालोकनतत्पराणांसौधेषुचामीकरजालवत्सु वभूवरित्थंपुरसुंदरीणांत्यक्तान्यकार्याणिविचेष्टि

© Dharmartha Trust J&K. Digitized by eGangotri

तानि ५ आलोकमार्गं सहसा व्रजंत्या कयाचिदुद्वेष्टनवांतमाल्यैः बंद्धुं न संभावित एव तावत्करेण रुद्धोपि हि केश
पाशः ६ प्रसाधिकालंबितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव उत्सृष्टलीलागतिरागवाक्षादलक्तकांकां पदवी
ततान ७ विलोचनं दक्षिणमंजनेन संभाव्य तद्वंचितवामनेत्रा तथैव वातायनसंनिकर्षं ययौ शलाकामपरा वहंती
८ जालांतरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबंध नीवीं नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलंब्य वा
सः ९ अर्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिता गलंती कस्याश्चिदासीद्रसना तदानीमंगुष्ठमूलार्पितसूत्रशेषा

© Dharmartha Trust J&K. Digitized by eGangotri

५१

रघु० १० तासांमुखैरासवगंधगर्भैर्व्याप्तांतरासांद्रकुतूहलानां विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणाइवासन् ११ ता
५१ राघवंदृष्टिभिरापिबंत्योनार्योनजग्मुर्विषयांतराणि तथाहिशेषेन्द्रियवृत्तिरासांसर्वात्मनाचक्षुरिवप्रविष्टा १२
५। स्थानेवृताभूपतिभिःपरोक्षैःस्वयंवरंसाधुममंस्तभोज्या पद्मेवनारायणमन्यथासौलभेतकान्तंकथमात्मतुल्यं १३ पर ५१
स्परेणस्पृहणीयशोभंनचेदिदंद्वंद्वमयोजयिष्यत् अस्मिन्द्वयेरूपविधानयत्नःपत्युःप्रजानांवितथोभविष्यत् १४
रतिस्मरौनूनमिमावभूतांराज्ञांसहस्रेषुतथाहिबाला गतेयमात्मप्रतितुल्यमेवमनोहिजन्मान्तरसंगतिज्ञं १५ इत्युद्गताः

© Dharmartha Trust J&K. Digitized by eGangotri

पौरवधूमुखेभ्यः श्रृण्वन्कथाःश्रोत्रसुखाःकुमारः उद्भासितंमंगलसंविधाभिःसंबंधिनः सद्मसमाससाद १६ चतुर्भिरंत्न
कुलकम ततोवतीर्याशुकरेणुकायाः सकामरूपेश्वरदत्तहस्तः वैदर्भनिर्दिष्टमथोविवेशनारीमनांसीवचतुष्कमन्तं १७ ॥
महार्हसिंहासनसंस्थितोसौ सरत्नमर्घ्यंमधुपर्कमिश्रं भोजोपनीतंचदुकूलयुग्मंजग्राह सार्द्धंवनिताकटाक्षैः १८ दु
कूलवासाःसवधूसमीपंनिन्येविनीतैरवरोधरक्षैः वेलासकाशंस्फुटफेनराशिर्नवैरुदन्वानिवचन्द्रपादैः १९ त्रि
भिःकुलकं तत्रार्चितोभोजपतेःपुरोधाहुत्वाग्निमाज्यादिभिरग्निकल्पः तमेवचाधायविवाहसाक्ष्येवधूवरौसंगमयांच

© Dharmartha Trust J&K. Digitized by eGangotri

५२

रघु० कार २० हस्तेनहस्तंपरिगृह्यवध्वाःसराजसूनुःसुतरांबभासे अनंतराशोकलताप्रवालंप्राप्येवचूतःप्रतिपल्लवेन॥
५२ २१ आसीद्वरःकंटकितप्रकोष्ठःस्विन्नांगुलिःसंववृतेकुमारी तस्मिन्द्वयेतत्क्षणमात्मवृत्तिःसमंविभक्तेवमनोभवे
52 न २२ तयोरपांगप्रतिसारितानिक्रियासमापत्तिविवर्त्तितानि ह्रीयंत्रणामानशिरेमनोज्ञामन्योन्यलोलानिवि ५२
लोचनानि २३ प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनंबभासे मेरोरुपांतेष्विववर्त्तमानमन्योन्यसं
सक्तमहस्त्रियामं २४ नितंबगुर्वीगुरुणाप्रयुक्तावधूर्विधातुःप्रतिमेनतेन चकारसामत्तचकोरनेत्रालज्जावती

© Dharmartha Trust J&K. Digitized by eGangotri

लाजविसर्गमग्नौ २५ हविः शमीपल्लवलाजगंधिः पुण्यः कृशानोरुदियाय धूमः कपोलसंसर्पिशिखः स तस्याः
मुहूर्त्तकर्णोत्पलतां प्रपेदे २६ तदंजनक्लेदसमाकुलाक्षं प्रम्लानबीजांकुरकर्णपूरं वधूमुखं पाटलगंडलेखमा
चारधूमग्रहणाद्बभूव २७ तौ स्नातकैर्बंधुमता च राज्ञा पुरंध्रिभिश्च क्रमशः प्रयुक्तं कन्याकुमारौ कनकासनस्था
वार्द्राक्षतारोपणमन्वभूतां २८ इति स्वसुर्भोजकुलप्रदीपः संपाद्य पाणिग्रहणं स राजा महीपतीनां पृथगर्हणा
र्थं समादिदेशाधिकृतानधिश्रीः २९ लिंगैर्मुदः संवृतविक्रियास्ते ह्रदाः प्रसन्ना इव गूढनक्राः वैदर्भमामंत्र्य ययुः

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० सरीयां क्रत्वर्थपूजामुपदाहृतेन ३० स राजलोकः कृतपूर्वसंविदारंभसिद्धौ समयोपलभ्यं आदास्यमानः प्रमदा
५३ मिषन्तदावृत्य पंथानमजस्य तस्थौ ३१ भर्तापि तावत्क्रथकैशिकानामनुष्ठितानंतरजाविवाहः सत्वानुरूपोहरणी
53 कृतश्रीः प्रास्थापयद्राघवमन्वगाच्च ३२ तिस्रस्त्रिलोकीप्रथितेन सार्द्धमजेन मार्गे वसतीरुषित्वा तस्मादपावर्त्तत कुं
डिनेशः पर्वात्यये सोम इवोष्णरश्मेः ३३ प्रमन्यवः प्रागपि कोशलेन्द्रे प्रत्येकमात्तस्वतया बभूवुः अतो नृपाश्चक्षमि ५३
रे समेताः स्त्रीरत्नलाभं न तदात्मजस्य ३४ तमुद्वहंतं पथि भोजकन्यां रुरोध राजन्यगणः स दृप्तः बलिप्रदिष्टां श्रियमा

© Dharmartha Trust J&K. Digitized by eGangotri

रसानंतैर्विक्रमं संपादमिवेंद्रेणात्रुः ३५ तस्याः सरस्वत्याप्यमवल्पयोधमादिष्यपित्र्यं सचिवं कुमारः प्रत्यग्रहीत्पार्थिववा
हिनीतां भागीरथीशोणइवोत्तरंगः ३६ पत्तिः पदातिं रथिनं रथेशस्तुरंगसादीतुरगाधिरूढं यंतागजस्याभ्यपतद्गज
स्थंतुल्यप्रतिद्वंद्विबभूवयुद्धं ३७ नदत्सुतूर्येष्वविभाव्यवाचोनोदीरयंति स्म कुलोपदेशान् बाणाक्षरैरेवपरस्पर
स्यनामोर्जितं चापभृतः शशंसुः ३८ ललाटबद्धभ्रूकुटीतरंगैस्तनुत्यजां दंतनिपीडितोष्ठैः आतन्वतेभल्लनिकृत्तकंठै
र्हुंकारगर्भैरवनिं शिरोभिः ३९ उत्थापितः संयति रेणुरश्वैः सान्द्रीकृतस्यन्दनवंशचक्रैः विस्तारितः कुंजरकर्णता

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० लैरनुक्रमेणोपरुरोधसूर्यं ४० मत्स्यध्वजा वायुवशाद्विदीर्णैर्मुखैः प्रवृद्धध्वजिनीरजांसि बभुः पिबंतः परमार्थमत्स्याः प
५४ र्याकुलानीव नवोदकानि ४१ रथो रथांगध्वनिना विजज्ञे विलोलघंटाक्वणितेन नागः स्वभर्तृनामग्रहणाद्बभूव सांद्रे र
54 रजस्यात्मपरावबोधः ४२ आवृण्वतो लोचनमार्गमाजौ रजोंधकारस्य विजृंभितस्य शस्त्रक्षताश्वद्विपवीरजन्मा बाला ५४
रुणोभूद्रुधिरप्रवाहः ४३ सच्छिन्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात्पवनावधूतः अंगारशेषस्य हुताशनस्य पूर्वोत्थितो
धूम इवावभासे ४४ प्रहारमूर्छापगमे रथस्था यंतॄनुपालभ्य निवर्तिताश्वान् यैः सादिता लक्षितपूर्वकेतूंस्तानेव सा

© Dharmartha Trust J&K. Digitized by eGangotri

मर्षितपाविजघ्नुः ४४ अप्यर्द्धमार्गे परबाणलूना धनुर्भृतां हस्तवतां पृषत्काः संप्रापुरेवात्मजवानुवृत्या पूर्वार्द्धभागैः फ
लिभिः शरव्यं ४६ आधोरणानां गजसंनिपाते शिरांसि चक्रैर्निशितैः क्षुरप्रैः हृतान्यपि श्येननखाग्रकोटिव्यासक्तकेशानि
चिरेण पेतुः ४७ पूर्वं प्रहर्ता न जघान भूयः प्रतिप्रहाराक्षममश्वसादी तुरंगमस्कंधनिषण्णकायं प्रत्याश्वसंतं रिपुमाचका
ङ्क्ष ४८ तनुत्यजां वर्मभृतां विकोशैः बृहत्सु दंतेष्वसिभिः पतद्भिः उद्यंतमग्निं शमयांबभूवुर्गजा विविग्नाः करशी
करेण ४९ शिलीमुखोत्कृत्तशिरःफलाढ्याः च्युतैः शिरस्त्रैश्चषकोत्तरेव रणक्षितिः शोणितमद्यकुल्या रराज मृत्यो

© Dharmartha Trust J&K. Digitized by eGangotri

५५

रघु० रिवपानभूमिः ५० उपान्तयोर्निःकुषितं विहंगैराक्षिप्य तेभ्यः पिशितप्रियापि केयूरकोटिक्षततालुदेशा शिवा भुजच्छेद
५५ मपाचकार ५१ कश्चिद्विषत्खड्गहृतोत्तमांगः सद्यो विमानप्रभुतामुपेत्य वामांगसंसक्तसुरांगनाः स्वं नृत्यत्कबंधं
समरे ददर्श ५२ अन्योन्यसूतोन्मथनादभूतां तावेव रथिनौ च कौचित् व्यश्वौ गदाव्यायतसंप्रहारौ भग्नायुधौ ५५
55 बाहुविमर्दनिष्ठौ ५३ परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रान्तवाय्वोः समकालमेव अमर्त्यभावेपि कयोश्चिदासीदेका
प्सरःप्रार्थितयोर्विवादः ५४ व्यूहावुभौ तावितरेतरस्मात् भंगं जयं चापतुरव्यवस्थं पश्चात्पुरोमारुतयोः प्रवृद्धौ पर्य्या

© Dharmartha Trust J&K. Digitized by eGangotri

यन्तेवमहार्णवोर्मी ५५ परेणाभ्येत्यपिवत्तैमहौजाःयथावज्ञः प्रत्यरिसैन्यमेव धूमोनिवर्त्ततसमीरणेन यतोहिक
क्षस्ततएववन्हिः ५६ रथीनिसंगीकवचीधनुष्मान्दृप्तःसराजन्यकमेकवीरः विलोडयामासमहावराहः कल्पक्ष
योद्धृतमिवार्णवांभः ५७ संदक्षिणंतूणमुखेनवामंव्यापारयन्हस्तमलक्ष्यताजौ आकर्णकृष्टासकृदस्ययोद्धुर्मौ
र्वीववाणान्सुषुवेरिपुघ्नान ५८ सरोषदष्टाधिकलोहितोष्ठैर्व्यक्तोर्ध्वरेखाभ्रुकुटीर्वहद्भिः तस्तारगांभल्लनिकृत्त
कंठैर्हुंकारगर्भैर्द्विषतांशिरोभिः ५९ सर्वैर्बलांगैर्द्विरदप्रधानैः सर्वायुधैःकंकटभेदिभिश्च सर्वप्रयत्नेनच

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० भूमिपालास्तस्मिन्नजस्तुयुधिसर्वएव ६० सोस्त्रव्रजैश्छन्नरथः परेभ्योध्वजाग्रमात्रेणबभूवलक्ष्यः नीहारमग्नोदि
५६ नपूर्वभागः किंचित्प्रकाशेनविवस्वतेव ६१ प्रियंवदात्प्राप्तमसौकुमारः प्रायुंक्तराजस्वधिराजसूनुः गांधर्वमस्त्रं
56 कुसुमास्त्रकांतः प्रस्वापनंस्वप्ननिवृत्तलौल्यः ६२ ततोधनुःकर्षणमूढहस्तमेकांसपर्यस्तशिरस्त्रजालं तस्थौध्वजस्तंभ
निषण्णदेहंनिद्राविधेयंनरदेवसैन्यं ६३ ततः प्रियोपात्तरसेधरोष्ठेनिवेश्यदध्मौजलजंकुमारः तेनस्वहस्तार्जित ५६
मेकवीरः पिबन्यशोमूर्त्तमिवाबभासे ६४ शंखस्वनाभिज्ञतयानिवृत्तास्तंसन्नशत्रुंददृशुःस्वयोधाः निमीलितानां

© Dharmartha Trust J&K. Digitized by eGangotri

मिव पंकजानां मध्येस्फुरंतं प्रतिमाशशांकं ६५ सशोणितैस्तेन शिलीमुखाग्रैः निक्षेपिताः केतुषु पार्थिवानां यशो हृ
तं संप्रति राघवेन न जीवितं वः कृपयेति वर्णाः ६६ स चापकोटीनिहितैकबाहुः शिरस्त्रनिःकर्षणभिन्नमौलिः लला
टबद्धश्रमवारिबिंदुर्भीतां प्रियामेत्य वभाषे ६७ इतः परानर्भकहार्यशस्त्रान्वैदर्भि पश्यानुमता मयासि एवंवि
धेनाहववाचेष्टितेन संप्रार्थ्यसे हस्तगता ममैभिः ६८ निश्वासवाष्पापगमात्प्रसन्नः प्रसादमात्मीयमिवात्मदर्शः
ह्री हृष्टापि सह्रीविजिता न साक्षाद्वाग्भिः सखीनां प्रियमभ्यनंदत् स्थली नवांभःप्रपताभिवृष्टा मयूरकेकाभिरि

© Dharmartha Trust J&K. Digitized by eGangotri

रघु. वाप्तमंदं ७० इति शिरसि स वामं पादमाधाय राज्ञामुदवहदनवद्यां तामवद्यादपेतः रथतुरगरजोभिस्तस्य रू
५७ क्षालकाग्रा समरविजयलक्ष्मीः सैव मूर्त्ता बभूव ७१ प्रथममधिगतार्थस्तं रघुः सन्निवृत्तं विजयिनमभिनंद्य श्ला
57 घ्यजायासमेतं तदुपहितकुटुंबः शांतिमार्गोत्सुकोभून्न हि सति कुलधुर्ये सूर्यवंश्या गृहाय ७२ ॐ इति श्रीरघु ५७
वंशे महाकाव्ये कविश्रीकालिदासकृतौ अजविजयो नाम सप्तमः सर्गः ७ ॐ अथ तस्य विवाहकौतुकं ललितं
बिभ्रत एव पार्थिवः सुधामपि हस्तगामिनीदिंदुमतीमिवापरां १ दुरितैरपि कर्तुमात्मसात्प्रयतंते नृपसून

© Dharmartha Trust J&K. Digitized by eGangotri

वोहियत तदुपस्थितमग्रहीदजः पितुराज्ञेति नभोगतृष्णया २ अनुभूयवशिष्ठः संभृतैः सलिलैनसहाभिषेचनं॥
विशदोच्छ्वसितेन मेदिनी कथयामास कृतार्थतामिव ३ स बभूव दुरासदः परैर्गुरुणाथर्वविदा कृतक्रियः पवना
ग्निसमागमोह्ययं सहितं ब्रह्मयदस्त्रतेजसा ४ रघुमेवनिवृत्तयौवनं तममन्यतनरेश्वरं प्रजाः सहितस्यनके
वलांश्रियंप्रतिपेदे सकलान्गुणानपि ५ अधिकंशुशुभेशुभंयुनाद्वितयेनद्वयमेवसंगतं पदमृद्धमजे
नपैतृकंविनयेनास्यनवंचयौवनं ६ सदयंबुभुजेमहाभुजः सहसोद्वेगमियंव्रजेदिति अचिरोपनतांसमेदि

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० श्रीनवपाणिग्रहणां वधूमिव ७ अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिंतयत् उदधेरिव निम्नगाशतेष्व
५८ भवन्नास्य विमानना क्वचित् ८ न खरो न च भूयसा मृदुः पवमानः पृथिवीरुहानिव स पुरस्कृतमध्यमो नमयामा
58 स नरपान नंतरान् ९ अथ वीक्ष्य रघुः प्रतिष्ठितं प्रकृतिष्वात्मजमात्मवित्तया विषयेषु निदिवस्यथापि निःस्पृ
हो भवत् १० गुणवत्सुतरोपितश्रियः परिणामे हि दिलीपवंशजाः पदवीं तरुवल्कवाससां प्रयताः संयमिनां व ५८
वासिरे ११ युगमे तमरण्यसमाश्रयोन्मुखं शिरसा वेष्टनशोभिना सुतः पितरं प्रणिपत्य पादयोरपरित्यागमया

© Dharmartha Trust J&K. Digitized by eGangotri

यतात्मनः १२ रघुरश्रुमुखस्य तस्य तत्कृतवानीप्सितमात्मजप्रियः नहि सर्प इव त्वचं पुनः प्रतिपेदे व्यपवर्जितां
श्रियं॥१३॥ स किलाश्रममंत्यमाश्रितो निवसन्नावसथे पुराद्बहिः समुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेंद्रियः
१४ प्रशमस्थितपूर्वपार्थिवं कुलमभ्युद्यतनूतनेश्वरं नभसा निभृतेंदुना तुलामुदितार्केण समारुरोह तत् १५ यति
पार्थिवलिंगधारिणौ ददृशाते रघुराघवौ जनैः अपवर्गमहोदयार्थयोर्भुवमंशाविव धर्मयोर्गतौ १६ अजिता
धिगमाय मंत्रिभिर्युयुजे नीतिविशारदैरजः अनपायिपदोपलब्धये रघुराप्तैः समियाय योगिभिः १७ नृपतिः प्रकृ

© Dharmartha Trust J&K. Digitized by eGangotri

श्री

रघु तीरवेदितुं व्यवहारासनमाददे युवा परिचेतुमुपांशुधारणां कुशपूतं प्रवयास्तु विष्टरं १८ अनयत्प्रभुशक्ति
५१ संपदा वशमेको नृपतीननंतरान् अपरः प्रणिधानयोग्यया मारुतः पंचशरीरगोचरान् १९ नयचक्षुरजो दि
दृक्षया पररंध्रमुत्सततान मंडले हृदये समैरायत्मनः परमज्योतिरवेक्षितुं रघुः २० अकरोदचिरेश्वरः क्षितौ द्वि श्री
59 षदारंभफलानि भस्मसात् इतरो दहने स्वकर्मणां ववृते ज्ञानमयेन वह्निना २१ पणबंधमुखान्गुणानजः ष
डुपायुंक्त समीक्ष्य तत्फलं रघुरप्यजयद्गुणत्रयं प्रकृतिस्थं समलोष्ठकांचनः २२ न नवः प्रभुरा फलोदयात्स्थिर

© Dharmartha Trust J&K. Digitized by eGangotri

कर्मणो विरराम कर्मणः नचयोगविधेर्नवेतरः स्थिर
धीरा परमार्थदर्शनात् २३ इतिशत्रुषु चेंद्रियेषु च प्रतिषिद्धप्रसरेषु जाग्रतौ प्रसितावुदयापवर्गयोरुभयींसि
द्धिमुभाववापतुः २४ अथ काश्चिदजव्यपेक्षया गमयित्वा समदर्शनसमाः तमसः परमापदव्ययंपुरुषंयोग
समाधिना रघुः २५ श्रुतदेहविसर्जनः पितुश्चिरमश्रूणि विमुच्य राघवः विदधे विधिमस्य नैष्ठिकं यतिभिः सार्द्ध
मनग्निमग्निचित् २६ अकरोच्च तदौर्ध्वदैहिकं पितृभक्त्या पितृकार्यविधानज्ञः वित् नहि तेन पथा तनुत्यज
स्तनयावर्जितपिंडकांक्षिणः २७ स परार्ध्यगतैरशोच्यतां पितुरुद्दिश्य सदर्थवेदिभिः समिताधिरधिज्यकार्मुकः

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० कृतवानप्रतिशासनंजगत् २८ क्षितिरिंदुमतीवभामिनीपतिमासाद्यतमग्र्यपौरुषं प्रथमाबहुरत्नसूरभूदपरावीर
६० मजीजनत्सुतं २९ दशरश्मिशतोपमद्युतिंयशसादिक्षुदशस्वपिश्रुतं दशपूर्वरथंयमाख्ययादशकंठारिगुरुंविदु
र्बुधाः ३० ऋषिदेवगणस्वधाभुजांश्रुतयागप्रसवैःसपार्थिवः अनृणत्वमुपेयिवान्बभौपरिधेर्मुक्तइवोष्ण
७ दीधितिः ३१ बलमार्तभयोपशांतयेविदुषांसत्कृतयेबहुश्रुतं वसुतस्यविभोर्नकेवलंगुणवत्तापिपरप्रयोजनं ६०
३२ सकदाचिदवेक्षितप्रजःसहदेव्याविजहारसुप्रजाः नगरोपवनेशचीसखोमरुतांपालयितेवनंदने ३३ अथरो

© Dharmartha Trust J&K. Digitized by eGangotri

धसिदक्षिणोदधेः श्रितगोकर्णनिकेतमीश्वरं उपवीणयितुं ययौ रवेरुदयावृत्तिपथेन नारदः ३४ कुसुमैर्ग्रथि
तामपार्थिवैः स्रजमातोद्यशिरोनिवेशितां अहरत्किल तस्य वेगवानधिवासस्पृहयेव मारुतः ३५ भ्रमरैः कुसु
मानुसारिभिः परिकीर्णा परिवादिनी मुनेः ददृशे पवनावलेपजं सृजती बाष्पमिवांजनाविलं ३६ अभिभूय
विभूतिमार्त्तवीं मधुगंधातिशयेन वीरुधां नृपतेरमरस्रगाप सा दयितोरस्स्तनकोटिसुस्थितिं ३७ क्षणमात्र
सखीं सुजातयोः स्तनयोस्तामवलोक्य विह्वला निमिमील नरोत्तमप्रिया हृतचंद्रा तमसेव कौमुदी ३८ वपुषा क

© Dharmartha Trust J&K. Digitized by eGangotri

६१

रघु० गोत्रिता न सा निपतंती पतिमप्यपातयत् ननु तैलनिषेकबिंदुना सह दीपार्चिरुपैति मेदिनीं ३९ उभयोरपि पार्श्व
६१ वर्त्तिनां तुमुलेनार्त्तरवेण वेजिताः विहगाः कमलाश्रयाः समदुःखा इव तत्र चुक्रुशुः ४० नृपतेर्व्यजनादिभिस्तमो
नुनुदे सा तु तथैव संस्थिता प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते ४१ प्रतियोजयितव्यवल्लकी ६१
61 समवस्थामथ सत्वविप्लवात् स निनाय नितांतवत्सलः परिगृह्योचितमंकमंगनां ४२ पतिरंकनिषण्णया तया
करणापायविभिन्नवर्णया समलक्ष्यत बिभ्रदाविलां मृगलेखामुषसीव चंद्रमाः ४३ विललाप स बाष्पगद्ग

© Dharmartha Trust J&K. Digitized by eGangotri

रं सहजामपहाय धीरतां अभितप्तमयोपि मार्द्दवं भजते कैव कथा शरीरिषु ४४ कुसुमान्यपि गात्रसंगमात्प्र
भवंत्यायुरपोहितुं यदि नभविष्यति हंत साधनं किमिवान्यत्प्रहरिष्यतो विधेः ४५ अथवा म्रदु वस्तु हिंसितुं म्र
दुनैवारभते प्रजांतकः हिमसेकविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं मता ४६ स्रगियं यदि जीवितापहा हृ
दये कन हंति मां विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया ४७ अथवा मम भाग्यविप्लवादशनि
:कल्पित एष वेधसा यदनेन न पातितः क्षपिता तद्विटपाश्रया लता ४८ कृतवत्यसि नावधीरणामपराधे

© Dharmartha Trust J&K. Digitized by eGangotri

६२

रघु॰ पिपदाविरंमपि कथमेकपदे निरागसं जनमाभाष्यमिमं नमन्यसे ४९ ध्रुवमस्मिशठः शुचिस्मिते विदितः कैतव
६२ वत्सलस्त्वया परलोकमसंनिवृत्तये यदनापृच्छ्य गतासि मामितः ५० दयितां यदि तावदन्वगाद्विनिवृत्तं किमिदं तया
विना सहतां हतजीवितं मम प्रबलामात्मकृतां तु वेदनां ५१ सुरतश्रमसंभृतो मुखे ध्रियते स्वेदलवोद्गमोपि ते॥
62 ननु वास्तमिता त्वमात्मना धिगिमां देहभृतामसारतां ५२ मनसापि न विप्रियं मया कृतपूर्वं तव किं जहासि मां ननुवौ ६२
शब्दपतिः क्षितेरहं त्वयि मे भावनिबंधना रतिः ५३ कुसुमोत्खचितान्वलीभृतश्चलयन्भृंगरुचस्तवालकान्॥

© Dharmartha Trust J&K. Digitized by eGangotri

करभोरु करोति मारुतस्त्वदुपावर्त्तनसंविभेमनः ५४ तदयोहितुमर्हसि प्रिये प्रतिबोधेन विषादमाशु मे ज्व
लितेन गुहागतं तमस्तुहिनाद्रेरिव नक्तमोषधिः ५५ इदमुच्छ्वसितालकं मुखं तव विश्रांतकथं दुनोति मां निशि
सुप्तमिवैकपंकजं विरताभ्यन्तरषट्पदस्वनं ५६ शशिनं पुनरेति शर्वरी दयिता द्वंद्वचरं पतत्रिणां। इति तौ
विरहान्तरक्षमौ कथमत्यंतगता न मां दहेः ५७ नवपल्लवसंस्तरेपि ते मृदु दूयेत यदंगमर्पितं तदिदं वि
षहिष्यते कथं वद वामोरु चिताधिरोहणं ५८ इयमप्रतिबोधशायिनीं रसना त्वां प्रथमा रहःसखी गतिविभ्र

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० प्रसादमीरयान्मृग्यानानुमन्यतेवललत्पते ५८ कलमन्यभृतासुभाषितं कलहंसीषुगतंमनोहरं हरिणीषुवि-
६३ लोलमीक्षितंपवनाधूतलतासुविभ्रमः ५९ त्रिदिवोत्सुकयाप्यवेक्ष्यमांनिहितासत्यममीगुणास्त्वया विरहे
तवमेगुरुव्यथंहृदयंनावलंबितुंक्षमाः ६० युगं मिथुनंपरिकल्पितंत्वयासहकारः फलिनीननुत्विमौ ॥
63 अविधायविवाहसत्क्रियामनयोर्गम्यतइत्यसांप्रतं ६१ कुसुमंकृतदोहदस्त्वयायदशोकमुदीरयिष्यति ६३
अलकाभरणंकथंनुततवनेष्यामिनिवापमाल्यतां ६२ स्मरतेवसशब्दनूपुरश्चरणानुग्रहमन्यदुर्लभं

अमुनाकुसुमास्रुवर्षिणा त्वमशोकेन सुगात्रि शोच्यसे ६४ तव निश्वसितानुकारिभिर्बकुलैरर्धचितां समं
मया असमाप्य विलासमेखलां किमिदं किन्नरकण्ठि सुप्यते ६५ समदुःखसुखः सखीजनः प्रतिपच्चन्द्र
निभोयमात्मजः अहमेकरसस्तथापि ते व्यवसायः प्रतिपत्तिनिष्ठुरः ६६ धृतिरस्तमिता रतिश्च्युता विरतं गेय
मृतुनिरुत्सवः गतमाभरणप्रयोजनं परिशून्यं शयनीयमद्य मे ६७ गृहिणी सचिवः सखी मिथः प्रिय
शिष्या ललिते कलाविधौ करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतं ६८ मदिराक्षि मदाननार्पितं

© Dharmartha Trust J&K. Digitized by eGangotri

६४

रघु० मधुपीत्वा रसवत्कथं नु मे अनुपास्यसि वाष्पदूषितं परलोकोपनतं जलांजलिं ६९ विभवेपि सति त्वया

विना सुखमेतावदजस्य गण्यतां अहतस्य विलोभनान्तरैर्मम सर्वे विषयास्त्वदाश्रिताः ७० विलपन्निति को

६४ शलाधिपः करुणार्थग्रथितं प्रियं प्रति अकरोत्पृथिवीरुहानपि स्रुतशाखारसबाष्पदुर्दिनान् ७१ अथ

64 तस्य कथंचिदंकतः स्वजनस्तामपहाय सुंदरीं विससर्ज कृतांत्यमंडनामनलायागुरुचंदनैधसे ७२ प्र ६४

प्रमदामनुसंस्थितः शुचा नृपतिः सन्निति वाच्यदर्शनात् नचकार शरीरमग्निसात्सह देव्या न तु जीविताश

© Dharmartha Trust J&K. Digitized by eGangotri

या ७३ अथतेनदशाहतःपरेगुणशेषामुपदिश्यसुंदरीं विदधुर्विधयोमहर्द्धयःपुरएवोपवनेधितेनिरे ७४
सविवेशपुरींतयाविनाक्षणदापायशशांकदर्शनः परिवाहमिवावलोकयन्स्वशुचःपौरवधूमुखाश्रुषु
७५ अथतंसवनायदीक्षितःप्रणिधानाद्गुरुराश्रमाश्रितः अभिषंगजडंविजज्ञिवानिति शिष्येण किलान्व
बोधयत् ७६ असमाप्तविधिर्यतोमुनिस्तवविद्वानपितापकारणं नभवंतमुपस्थितःस्वयंप्रकृतौस्था
पयितुंकृतास्थितिः ७७ मयितस्यसुवृत्तवर्त्ततेलघुसंदेशपदासरस्वती शृणुविश्रुतसत्वसारतां हृदिचैना

© Dharmartha Trust J&K. Digitized by eGangotri

६५

रघु० मुपस्थातुमर्हसि ७८ पुरुषस्यपदेष्वजन्मनःसमतीतंचभवच्चभाविच सहिनिःप्रतिघेनचक्षुषात्रितयंज्ञानमयेनप
६५ श्यति ७९ चरतःकिलदुश्चरंतपस्तृणविंदोःपरिशंकितःपुरा प्रजिघायसमाधिभेदिनीहरिरस्मैहरिणींसुराङ्गनां ८०
सतपःप्रतिबंधमन्युनाप्रमुखाविःकृतचारुविभ्रमां अशपद्भवमानुषीतितांशमवेलाप्रलयोर्मिणामुनिः ८१ भ
65 भवन्परवानयंजनःप्रतिकूलाचरितंक्षमस्वमे इतिचोपनतांक्षितिस्पृशंकृतवानासुरपुष्पदर्शनात् ८२ क्रथकै ६५
शिकवंशसंभवातवभूत्वामहिषीचिरायसा उपलभ्यवतीदिवश्च्युतंविवशाशा पनिवृत्तिकारणं तदलंत

© Dharmartha Trust J&K. Digitized by eGangotri

इयायचिन्तयाविपदुत्पत्तिमतामुपस्थिता वसुधेयमवेक्ष्यतांत्वयावसुमत्याहिनृपाः कुलत्रिणः २४ उदयेपदवा
च्यमुज्झताश्रुतमाविष्कृतमात्मनस्त्वया मनसस्सदुपस्थितेज्वरेपुनरक्लीवतयाप्रकाश्यतां २५ रुदताकुतएवसा
पुनर्भवतानानुमृतापिलभ्यते परलोकजुषांस्वकर्मभिर्गतयोभिन्नपथाहिदेहिनां २६ अपशोकमनाःकु
टुम्बिनीमनुगृह्णीष्वनिवापदत्तिभिः स्वजनाश्रुकिलातिसंततंदहतिप्रेतमितिप्रचक्षते २७ मरणंप्रकृतिःशर
रीरिणांविकृतिर्जीवितमुच्यतेबुधैः क्षणमप्यवतिष्ठतेश्वसन्यदिजंतुर्ननुलाभवानसौ २८ अवगच्छतिमूढचे

© Dharmartha Trust J&K. Digitized by eGangotri

रघु०
६६
66

तनः प्रियनाशहृदिशल्यमर्पितं इतरस्तुतदेवमन्यते कुशलद्वारतयासमुद्धृत ८८ स्वशरीरशरीरिणावपिश्रुतसं
योगविपर्ययौयदा विरहः किमिवानुतापयेद्वदबाह्यैर्विषयैर्विपश्चितं ८९ नपृथग्जनवच्छुचोवशंवशि
नामुत्तमगंतुमर्हसि द्रुमसानुमतांकिमंतरं यदिवायौद्वितयेपितेचलाः ९० सतथेतिविनेतुरुदारमतेः प्रतिगृ ६६
ह्यवचोविससर्जमुनिं तदलब्धपदंहृदिशोकघने प्रतियातमिवांतिकमस्यगुरो ९१ तेनाष्टौपरिगमिताः समा
कथंचिद्बालत्वादवितथसूनृतेनसूनोः सादृश्यप्रतिकृतिदर्शनैः प्रियायाः स्वप्नेषुक्षणिकसमागमोत्सवैश्च

© Dharmartha Trust J&K. Digitized by eGangotri

33

॥९३॥ तस्यप्रसह्यहृदयंकिलशोकशंकुः प्लक्षप्ररोहइवसौधतलंबिभेद प्राणांतहेतुमपितंभिषजामसाध्यंला
भंप्रियानुगमनेत्वरजासमेने ॥९४॥ सम्यग्विनीतमथवर्महरंकुमारमादिश्यरक्षणविधौविधिवत्प्रजानां रोगो
पसृष्टतनुदुर्वसतिंमुमुक्षुः प्रायोपवेशनमतिर्नृपतिर्बभूव ॥९५॥ तीर्थेतोयव्यतिकरभवेजन्हुकन्यासरय्वो
र्देहत्यागादमरगणनालेख्यमासाद्यसद्यः पूर्वाकाराधिकतररुचासंगतःकान्तयासौलीलागारेष्वरमतपुन
र्नन्दनाभ्यंतरेषु ॥९६॥ इतिश्रीरघुवंशेमहाकाव्येकविश्रीकालिदासकृतौअजविलापोनामाष्टमःसर्गः ८ ॥ पि

© Dharmartha Trust J&K. Digitized by eGangotri

रघु॰ पितुरनंतरमुत्तरकोशलान्समधिगम्यसमाधिजितेन्द्रियः दशरथः प्रशशासमहारथोयमवतामवतांचधुरिस्थि
तः १ अधिगतंविधिवद्यदपालयत्प्रकृतिमंडलमात्मकुलोचितं अभवदस्यततोगुणवत्तरंसनगरंनगरंध्रक
६९ करौजसः २ उभयमेववदंतिमनीषिणःसमयवर्षितयाकृतकर्मणां बलनिषूदनमर्थपतिंचतंश्रमनु ६९
67 दंमनुदंडधरान्वयं ३ जनपदेनगदःपदमादधावभिभवःकुतएवसपत्नजः क्षितिरभूत्फलवत्यजनंदने
शमरतेजसिपार्थिवे ४ दशदिगंतजितारघुणायथाश्रियमपुष्यदजेनततःपरं तमधिगम्यतथैवपुनर्बं

63

मौलननमहीनहीनपराक्रमं ५ समतयावसुवृष्टिविसर्जनैर्नियमनादसतांचनराधिपः अनुययौयम
पुण्यजनेश्वरौसवरुणावरुणाग्रसरंरुचा ६ नमृगयाभिरतिर्नदुरोदरंनचशशिप्रतिमाभरणंमधु तमुद
यायनवानवयौवनाप्रियतमायतमानमपाहरत ७ नकृपणाप्रभवत्यपिवासवेन वितथापरिहासक
थास्वपि नसपत्नजनेष्वपितेनवागपरुषापरुषाक्षरमीरिता ८ अवनिमेकरथेनवरूथिनाजितवतः
किलतस्यधनुर्भृतः विजयदुन्दुभितांययुरर्णवाघनरवानरवाहनसंपदः ९ उदयमस्तमयंचरघूद्वहादुभय

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० मानशिरेव सुधाधिपाः सहि देशमलंघयतामनून्सुहृदयोहृदयं प्रतिगर्जितां १० ॥ जयदेकरथेन समेदिनीमु
६८ दधिनेमिमधिज्यशरासनः जयमघोषयदस्यहि केवलं गजवती जवतीव्रहयाचमूः ११ जघननिर्विषयीकृ
तमेखलाननुचितास्रुविलुप्तविशेषकान् सरिपुदारगणानकरोद्बलादनलकानलकाधिपविक्रमः १२ । ६८
68 शमितपक्षबलः शितकोटिना शिखरिणां कुलिशेन पुरन्दरः सशरवृष्टिमुचा धनुषा द्विषां स्वनवता नवता
मरसा नतः १३ चरणयोर्नखरागसमृद्धिभिर्मुकुटरत्नमरीचिभिरस्पृशन् नृपतयः शतशो मरुतो यथा शतमखं

© Dharmartha Trust J&K. Digitized by eGangotri

तमखंडितविक्रमं १४ स्फुरितकोटिसहस्रमरीचिनासमचिनोत्कुलिशेन हरिर्यशः सधनुषायुधि शायकव
र्षिणा स्वनवतानवतामरसाननः १५ निववृते स महार्णवरोधसः सचिवकारितबालसुताञ्जलीन् समनुकी
र्णपसपत्नपरिग्रहाननलकानलकामिव तां पुरीं १६ उपगतोपि च मंडलनाभितामनुदितान्यसितातपवा
रणः श्रियमवेक्ष्य स रंध्रचलामभूदनलसोमसमद्युतिः १७ क्रतुषु तेन विसर्जितमौलिना भुजसमाहृतदि
ग्वसुना कृताः कनकयूपसमुच्छ्रयशोभिनो वितमसा तमसा परिपूततटाः १८ अजिनदंडभृतकुशमेखल

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० तांयतगिरेमगाम्रस्तु परियतां अधिवसंस्तनुमध्वरदीक्षितामसमभासयदीश्वरैः १९ अवभृथप्रयतो विजि
69 तेन्द्रियः सुरसमाजसमाक्रमणोचितः नमयति स्म स केवलमुन्नतं वनमुचे नमुचेरये शिरः २० तमपहाय ककुत्स्थ
कुलोद्भवं पुरुषमात्मभुवं च पतिव्रता नृपतिमन्यमसेवत देवता सकमला कमलाघवमर्थिषु २१ स किल सं
युगमूर्ध्नि सहायतां मघवतः प्रतिपद्य महारथः स्वभुजवीर्यमगापयदुच्छ्रितं सुरवधूरवधूतभयाः शरैः २२ अ
सकृदेवहितेन तरस्विना हरिहयाग्रसरेण धनुर्भृताः दिनकराभिमुखा रणरेणवो रुरुधिरे रुधिरेण सुरद्विषां २३

© Dharmartha Trust J&K. Digitized by eGangotri

तमलभंत पतिंपतिदेवताः शिषरिणामिवसागरमापगाः मगधकोशलकेकयशासिनांदुहितरोहितरोपितमार्ग
णं २४ प्रियतमाभिरसौतिसृभिर्बभौ तिसृभिरेवभुवंसहशक्तिभिः उपगतो विनिनीषुरिवप्रजाहरिहयोभि
योगविचक्षणैः २५ अथसमाववृतेकुसुमैर्नवैस्तमिवसेवितुमेकनराधिपं यमकुबेरजलेश्वरवज्रिणांसम
धुरंमधुरंचितविक्रमं २६ हिमविवर्जितचंदनपल्लवंविरहयन्मलयाद्रिमुदङ्मुखः विहगयोःकृपयेवश
नैर्ययौरविरहर्विरहध्रुवभेदयोः २७ जिगमिषुर्धनदाध्युषितांदिशंरथयुजापरिवर्तितवाहनः दिनमु

© Dharmartha Trust J&K. Digitized by eGangotri

७०

रघु॰ रवानि रविर्हिमनिग्रहैर्विमलयन्मलयं नगमत्यजत् २८ कुसुमजन्म ततो नवपल्लवास्तदनु षट्पदकोकिलकू॰
७० जितं इति यथाक्रममाविरभून्मधुर्द्रुमवतीमवतीर्य वनस्थलीं २९ अभिनयान्परिचेतुमिवोद्यता मलयमारुत
७० कंपितपल्लवा अमदयत्सहकारलता मनः सकलिका कलिकामजितामपि ३० विशदचंद्रकरं सुखमारुतं कु
सुमितद्रुममुन्मदकोकिलं तदुपभोगरसं हिमवर्षिणः परमृतोरमृतापम॰ तां ययौ ३१ व्रणगुरुप्रमदाधर ७०
दुःसहं जघननिर्विषयीकृतमेखलं न खलु तावदशेषमपोहितुं रविरलं विरलं कृतवान्हिमं ३२ परभृता

© Dharmartha Trust J&K. Digitized by eGangotri

मदमह्नन्नवेतसः प्रियसखीलघुवागिव योषितां प्रियतमानकरोत्कलहांतरैन्दुरवादुरवायसमागमान् ३३ कुसु
ममेव न केवलमार्त्तवं नवमशोकरोःस्मरदीपनं किशलयप्रशवोपि विलासिनां मदयितादयिताश्रवणार्पितः ३४ न
यगुणोपचितामिव भूपतेः सदुपकारफलां श्रियमर्थिनः अभिययुः सरसोमधुसंभृतां कमलिनीमलिनीरपत
त्रिणः ३५ विरचितामधुनोपवनश्रियाकुसुमजालमशोचन किंशुके प्रणयिनी) मभिनवाइव पत्रविशेषकाः म
धुलिहां मधुदानविशारदाः कुरवकारवकारणतां ययुः ३६ उपहितं शिशिरापगमश्रियाकुसुमजालमशोचनकिं

© Dharmartha Trust J&K. Digitized by eGangotri

७१

रघु० मुखे प्राणयिनीव नखक्षतमंडनं प्रमदया मदयापितलज्जया ३७ अनलसान्यभृतानलसा मनः कमलधूलि
५१ मरुतेरिता कुसुमभारनताध्वगयोषितामसममशोकमशोकलताकरोत् ३८ लघयति स्मन पत्यपराधजान्न स
हकारतरुः स्मरनीकृतां कुसुमितोन्नमितोत्तिभिरुन्मदैः स्मरसमाधिकरो धिकरोचतां ३९ सुवदनावदनासव ७१
७१ संभृतस्तदनुवादिगुणाः कुसुमोद्गमः मधुकरैरकरो मधुलोलुपैर्बकुलमाकुलमायतपंक्तिभिः ४० सुरभिसंग
मजं वनमालया नवपलाशमधार्यत भंगुरं मरणाद्दतमिवार्द्धनखक्षतं प्रमदया मदयापितलज्जया ४१

© Dharmartha Trust J&K. Digitized by eGangotri

प्रथममन्यभृताभिरुदीरिताः प्रविरला इव मुग्धवधूकथाः सुरभिगंधिषु शुश्रुविरे गिरः कुसुमितासु मिता वन
राजिषु ४२ श्रुतिसुखभ्रमरस्वनगीतयः कुसुमकोमलदन्तरुचो बभुः उपवनान्तलताः पवनाहतैः किस
लयैः सलयैरिव पाणिभिः ४३ अपतुषारतया विशदप्रभैः सुरतरागपरिश्रमनोदिभिः कुसुमचापमघते
जयदंशुभिर्हिमकरो मकरोर्जितकेतनं ४४ ललितविभ्रमबंधविचक्षणं सुरभिगंधविवर्जितकेशरं पति
षु निर्विविशुर्मधुमङ्गनाः स्मरसखं रसखंडनवर्जितं ४५ शुश्रुभिरे स्मितचारुतराननाः स्त्रिय इव श्लथसिंजि

© Dharmartha Trust J&K. Digitized by eGangotri

७१

७२ तमेखलाः विकचितामरसा गृहदीर्घिका मदकलोदकलोलविहंगमाः ४६ उपययौ तनुतां मधुखंडिमकरोदय
पांडुमुखच्छविः शमयितुं प्रियसंजनितां व्यथामसहयासहयाम्बतीवधूः ४७ हुतहुताशनदीप्ति वनश्रियः प्रति
१२ निधिः कनकाभरणस्य यत युवतयः कुसुमं दधुराहितं तदलके दलकेसरपेशलं ४८ अलिभिरंजनबिन्दुमनो
हरैः कुसुमपंक्तिनिपातिभिरंकितः नखलु शोभयतिस्म वनस्थलीं नतिलकस्तिलकः प्रमदामिव ४९ ध्वजपदं ७२
मदनस्य धनुर्भृतश्छविकरं मुखचूर्णमृतुश्रियः कुसुमकेसररेणुमलिव्रजाः सपवनोपवनोत्थितमन्वयुः ५०

© Dharmartha Trust J&K. Digitized by eGangotri

अनुभवन्नवदोलमृतूत्सवंपटुरपिप्रियकंठजिघृक्षया: अनयदासनरज्जुपरिग्रहेभुजलतांजडतामबलाजनः ५१
त्यजतमानमलंबतविग्रहैर्न्नपुनरेतिगतंचतुरंवयः परभृताभिरि।तीवनिवेदितेस्मरमतेरमतेस्मवधूजनः ५२ अ
मरवमकुगधमनाप्ययाकिशलयाधरसंगतपाणिनः कुसुमभारनतानवमल्लिकास्मितरुचातरुचारुविलासिनी
५३ अरुणरागनिषेधिभिरंसुरलयाधरसंगतयोर्मनः कलस्वपदैश्चयवांकुरैः परभृताविरुतैश्चविलासिनः स्म
रबलैरबलैकरसाः कृताः ५४ उपचितावयवाशुचिभिः कणैरलिकदंबकयोगमुपेयुषी सदृशकांतिरलक्ष्यतमं

© Dharmartha Trust J&K. Digitized by eGangotri

७३

२५० नरीतिलककुजालकमौक्तिकैः ५५ तिलकमस्तहर्म्यकृतास्पदैः कुसुममध्वनुषंगनिषादिभिः कलमगीयत भृंग
७२ विलासिभिः स्मरयतैरवलासखैः ५६ गमयितुं प्रभुरेवसुखेनमां नमनीवितपांथवधूजनः इतिदयात इवाभव
73 दायतानराजनीरजनीशवतीमधौ ५७ अथयथासुखमार्तवमुत्सवसमनुभूयविलासवतीसखः नरपतिश्च ७३
कमेमृगयारतिममधुमन्मधुमत्त्रयसंनिभः ५८ परिचयंचललक्ष्यनिपातनेभयरुषोश्चतदिंगितबोधनं सम
जयात्प्रगुणांचककारोपसौतनुमतोऽनुमतःसचिवैर्ययौ ५९ मृगवनोपगमक्षममवेषभृद्विपुलकंठनिषक्तशरा

© Dharmartha Trust J&K. Digitized by eGangotri

सनः गगनमश्वखुरोद्धतरेणुभिर्नृसविता सवितानमिवाकरोत ५० मथितमौलिरसौ वनमालया नवपला
शसवर्णितनुच्छदः तुरगवल्गुनचंचलकुंडलो विरुरुचे रुरुचेष्टितभूमिषु ५१ तनुलताविनिवेषितविग्रहाभ्र
मरसंक्रमितेक्षणवृत्तयः ददृशुरध्वनितं वनदेवताः सुनयनं नयनंदितकोशलं ५२ श्वगणिवागुरिकैः प्रथमा
स्थितं व्यपगतानलदस्युदिवेश सः स्थिरतुरंगमभूमिनिपानवन् मृगवयोगवयोपचितं वनं ५३ अथ नभ
स्य इव त्रिदशायुधं कनकपिंगतडिद्गुणसंगतं धनुरधिज्यमनाधिरुपाददे नरवरो रवरोषितकेसरी ५४ तस्य स

© Dharmartha Trust J&K. Digitized by eGangotri

रघु० नयिमिम्मुहरेण शावैर्व्याहन्यमानहरिणीगमनं पुरस्तात् आविर्बभूव कुशगर्भमुखं मृगाणां यूथं तदग्रसरगर्वितकृ
(७६) ष्णसारं ६५ तत्प्रार्थितं जवनवाजिगतेन राज्ञा तूणीमुखोद्धृतशरेण विशीर्णपंक्ति: श्यामीचकार वनमाकुलदृष्टिपातै र्वा
75 तेरितोत्पलदलप्रकरैरिवाम्रः ६६ लक्ष्यीकृतस्य हरिणस्य हरिप्रभावः प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहं आकर्णकृष्ट
मपि कामितया स धन्वी बाणं कृपामृदुमनाः प्रतिसंजहार ६७ तस्यापरेष्वपि मृगेषु शरान्मुमुक्षोः कर्णान्तमेत्य विभि ७५
दे निबिडोपि मुष्टिः त्रासातिमात्रचटुलैः स्मरतः सुनेत्रैः प्रौढप्रियानयनविभ्रमचेष्टितानि ६८ उत्तस्थुषः शिशि

© Dharmartha Trust J&K. Digitized by eGangotri

रपल्वलपंकमध्यान्मुस्ताप्ररोहकवलावयवानुकीर्णं जग्राह स द्रुतवराहकुलस्य मार्गं सुव्यक्तमार्द्रपदपंक्ति
भिरायताभिः ६९ तं वाहनादवनतोत्तरकायमीषद्विध्यंतमुद्धतसटाः प्रतिहंतुमीषुः नात्मानमस्य विविदुः सह
सा वराहा वृक्षेषु विद्धमिषुभिर्जघनाश्रयेषु ७० तेनाभिघातरभसस्य विकृष्य पत्री वन्यस्य नेत्रविवरे महिष
स्य मुक्तः निर्भिद्य विग्रहमशोणितलिप्तपुंखस्तं पातयांप्रथममास पपात पश्चात ७१ प्रायो विषाणप
रिमोक्षलघूत्तमांगान्खड्गांश्चकार नृपतिर्निशितैः क्षुरप्रैः शृंगं स दृप्तविनयाधिकृतः परेषामत्युच्छ्रितं नम

© Dharmartha Trust J&K. Digitized by eGangotri

७५

रघु॰ सखेनतु दीर्घमायुः ७२ व्याघ्रानभीरभिमुखोत्पतितान्गुहाभ्यः फुल्लासनाग्रविटपानिव वायुभग्नान् शिक्षा
७५ विशेषलघुहस्ततयानिमेषात्तूणीचकार शरपूरितवक्त्ररंध्रान् ७३ निर्घातोग्रैः कुंजलीनांजिघांसुर्ज्यानिर्घो
75 षैः क्षोभयामाससिंहान् नूनंतेषामभ्यसूयापरोभूद्वीर्योदग्रेराजशब्देमृगेषु ७४ तान्हत्वागजकुलब
द्धतीव्रवैरान्काकुत्स्थः कुटिलनखाग्रमुक्तान् आत्मानंरणकृतकर्मणांगजानामानृण्यंगतमिवमार्ग॥ ७५
णैरमंस्त ७५ चमरान्परितः प्रवर्तिताश्वः क्वचिदाकर्णविकृष्टभल्लवर्षी नृपतीनिवतान्वियोज्यसद्यः॥

© Dharmartha Trust J&K. Digitized by eGangotri

सितवालव्यजनैर्जगाम शांतिम् ७६ अपि तुरगसमीपादुत्पतंतं मयूरं न स रुचिरकलापं बाणलक्षीचकार सपदि
गतमनस्कश्चित्रमाल्यानुकीर्णे रतिविगलितबंधे केशपाशे प्रियायाः ७७ तस्य कर्कशविहारसंभवं स्वेदमान
नविलग्नजालकं आचचाम सतुषारशीकरो भिन्नपल्लवपुटो वनानिलः ७८ इति विस्मृतान्यकरणीयमा
त्मनः सचिवावलंबितधुरं धराधिपं परिवृद्धरागमनुबंधसेवया मृगया जहार चतुरेव कामिनी ७९ स ललि
तकुसुमप्रवालशय्यां ज्वलितमहौषधिदीपिकासनाथाम् नरपतिरतिवाहयांबभूव क्वचिदसमेतपरिच्छदस्त्रिया

रघु० ७६

यामां ७० उपसि सगजयूथकर्णतालैः पटुपटहध्वनिभिर्विनीतनिद्रः अरमंप्रतिरतिवाहयांबभूव कश्चिदस
मेतमधुरस्वनाति शृण्वन्विहगविकूजितवंदिमंगलानि ७१ अथजातुरुरोर्गृहीतवर्त्मा विपिने पार्श्वचरैरल
क्ष्यमाणः श्रमफेनमुचा तपस्विगाढां तमसां प्राप नदीं तुरंगमेण ७२ कुंभपूरणभवः पटुरुच्चैरुच्चचार ७६
निनदोऽम्भसि तस्याः तत्र स द्विरदबृंहितशंकी शब्दपातिनमिषुं विससर्ज ७३ नृपतेः प्रतिषिद्धमेव तत्कृत
वान्पंक्तिरथो विलंघ्य यत् अपथे पदमर्पयन्ति हि श्रुतवन्तोपि रजोनिमीलिताः ७४ हा तातेति क्रंदितमा

© Dharmartha Trust J&K. Digitized by eGangotri

कपिविचलत्सत्स्याविध्यन्वेतसगूढ प्रभवम्: शल्यप्रोतं वीक्ष्य सकुंभं मुनिपुत्रं तापादन्तःशल्य इवासीत्
क्षितिपोपि ॥ ७५ तेनावतीर्य तुरगात्प्रथितान्वयेन पृष्टान्वयः स जलकुंभनिषण्णदेहः तस्मै द्विजेतरतपस्विसु
तमस्खलद्भिरात्मानमक्षरपदैः कथयांबभूव ॥ ७६ तच्चोदितश्च तमनुद्धृतशल्यमेव पित्रोः सकाशमवसन्नदृ
शोर्निनाय ताभ्यां तथागतमुपेत्य तमेकपुत्रमज्ञानतः स्वचरितं नृपतिः शशंस ॥ ७७ तौ दंपती बहु विलप्य शि
शोः प्रहर्त्रा शल्यं निखातमुदहारयतामुरस्तः सोऽभूत्परासुरथ भूमिपतिं शशाप हस्तार्पितैर्नयनवारिभिरेव

© Dharmartha Trust J&K. Digitized by eGangotri

रघु. न्नुद्धः ७८ दिष्टांतमाप्स्यति भवानपि पुत्रशोकादन्त्ये वयस्यहमिवेति तमुक्तवंतं आक्रांतपूर्वमिव मुक्तविषं भुजंगं ॥
११ प्रोवाच कोशलपतिः प्रथमापराधः ७९ शापोप्यदृष्टतनयाननपद्मशोभे सानुग्रहो भगवता मयि पातितोयम् ॥
77 कृष्यान्दहन्नपि खलु क्षितिमिंधनेद्धो वीजप्ररोहजननीं ज्वलनः करोति ८० इत्थंगते गतघृणः किमयं वि ११
धत्तां वध्यस्तवेत्यभिहितो वसुधाधिपेन एधान्हुताशनवतः स मुनिर्ययाचे पुत्रं परासुमनुगंतुमनाः सदा
रः ८१ प्राप्तानुगः सपदि शासनमस्य राजा संपाद्य पातकविलुप्तधृतिर्निवृत्तः अंतर्निविष्टपदमात्मवि

© Dharmartha Trust J&K. Digitized by eGangotri

विनाशहेतुःशापन्दधज्ज्वलनमौर्घमिवांवुराशि ८२ इतिश्रीरघुवंशेमहाकाव्येकविश्रीकालिदासकृतौनवमः
सर्गः ॥ ९ ॥ पृथिवींशासतस्तस्यपाकशासनतेजसः किंचिदूनमनूनर्द्धेःशरदामयुतंययौ १ नचोपलेभेपू
र्वेषामृणनिर्मोक्षसाधनंसुताभिधानंसज्योतिःसद्यःशोकतमोपहं २ मनोर्वंशाशिरंतस्मिन्ननभिव्यक्तसंतते
ति निमज्ज्यपुनरुत्थानान्नदःशोणइवाभवत ३ अतिष्ठत्प्रत्ययापेक्षसंततिःसचिरंनृपः प्राङ्मन्थादनभि
व्यक्तरत्नोत्पत्तिरिवार्णवः ४ ऋष्यशृंगादयस्तस्यसन्तःसंतानकांक्षिणः आरेभिरेयतात्मानःपुत्रीयामिष्टिमृत्विजः ५

© Dharmartha Trust J&K. Digitized by eGangotri

७८ त स्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिं अभिजग्मुर्निदाघार्त्ताश्छायावृक्षमिवाध्वगाः ५ ते च प्रापुरुदन्वन्तं बुबुधे चादिपुरुषः अ
र॰ व्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् ६ भोगिभोगासनासीनं ददृशुस्तं दिवौकसः तत्फणामंडलोदर्चिर्मणिद्योतित
78 विग्रहम् ७ श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले अंके निक्षिप्तचरणमास्तीर्णकरपल्लवे ८ प्रबुद्धपुंडरीकाक्षं बा
लातपनिभांशुकं दिवसं शारदमिव प्रारम्भसुखदर्शनम् ९ प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम् कौस्तुभाख्यमपां
सारं बिभ्रन्तं बृहतोरसा १० बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः आविर्भूतमपां मध्ये पारिजातमिवापरम् ११ दैत्यस्त्री ७८ न॰

© Dharmartha Trust J&K. Digitized by eGangotri

गंडलेखानां मदरागविलोपिभिः हेतिभिश्चेतनावद्भिरुदीरितजयस्वनम् १२ मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा उपस्थि
तं प्रांजलिना विनीतेन गरुत्मता १३ योगनिद्रान्तविशदैः पावनैरवलोकनैः भृग्वादीननुगृह्णन्तं सौखशायनिकानृषीन्
१४ कुलकम् प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषां अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम् १५ नमो विश्वसृजे पूर्वं विश्वं
तदनु बिभ्रते अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने एककारणमज्ञातानवस्थं प्रतिपद्यसे नानात्वं रागसंयोगात्स्फ
टिकस्येव ते स्तुते १७ रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः १८ अमेयो मितलोकस्त्व
मनर्थी प्रार्थनावहः अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम् १९ हृदयस्थमनासन्नमकामं त्वां तपस्विनम् दयालु

© Dharmartha Trust J&K. Digitized by eGangotri

७८ नं० मदयास्त्वं पुराणमजरं विदुः २० सर्वज्ञस्त्वमविज्ञानः सर्वयोनिश्च मात्मभूः सर्वप्रभुरनीशस्त्वमेव त्वं सर्वरूपभाक्
२१ त्वत्तस्सामोपगीतं चाम्ससार्णवजलेशायम् सप्तार्चिर्मुखमाचक्षुः सप्तलोकैकसंश्रयम् २२ चतुर्वर्गफलं ज्ञानं कालाव-
71 स्थाश्चतुर्युगाः चतुर्वर्णमयो लोकः त्वत्तः सर्वं चतुर्मुखात् २३ अभ्यासनिगृहीतेन मनसा हृदयाश्रयम् ज्योतिर्मयं वि-
चिन्वंति योगिनस्त्वां विमुक्तये २४ अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः स्वपतो जागरूकस्य याथात्म्यं वेदकस्तव २५
शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः ययासि प्रजाः पातुमौदासीन्येन वर्त्तितुं २६ बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धि- ७८ र०

© Dharmartha Trust J&K. Digitized by eGangotri

हेतवः त्वय्येवनियतंतस्मायाद्यानन्तवीर्याद्र्वाणिवे २७ त्वयावेशितचित्तानांत्वत्समर्प्पितकर्म्मणाम् गतिस्त्वंवीतरागाणामभूयःसंभवाय
२८ प्रत्यक्षोप्यपरिच्छेद्योमह्यादिर्महिमातव आप्तवागनुमानाभ्यांसाध्यंत्वांप्रतिकाकथा २९॥ केवलंस्मरणेनापिपुनासि
पुरुषंयतः अनेनवृत्तयःशेषानिवेदितफलास्त्वयि ३० उदधेरिवरत्नानितेजांसीवविवस्वतः स्तुतिभ्योव्यतिरिच्यन्तेदूरेण
चरितानिते ३१ अनवाप्तमवाप्तव्यंनतेकिंचनविद्यते लोकानुग्रहएवैकोहेतुस्तेजन्मकर्म्मणोः ३२ महिमानंयदुत्कीर्त्यत
वसंह्रियतेवचः श्रमेणतदशक्त्यावानगुणानामियत्तया ३३॥ इतिप्रसादयामासुस्तेसुरास्तमधोक्षजम् भूतार्थव्याहृतिः
साहिनस्तुतिःपरमेष्ठिनः ३४ तस्मैकुशलसंप्रश्नव्यंजितप्रीतयेसुराः भयमप्रलयोद्वेलादाचख्युर्नैरृतोदधेः ३५ अथवे
लासमासन्नशैलरंध्रानुनादिना स्वरेणोवाचभगवान्परिभूतार्णवध्वनिः ३६ पुराणस्यकवेस्तस्यवर्णस्थानसमीरिता बभूव

© Dharmartha Trust J&K. Digitized by eGangotri

८० मं० कृतसंस्कारा त्वरितार्थैव भारतीव मौसद्ज्ञानज्योत्स्ना साविभो वेदनोऽङ्गना निर्यातित्रोषाचरणान्नगङ्केवोर्द्ध्वप्रवर्तिनी ३८ ज्ञानेवा
रत्नसाक्रान्तावनुभावपराक्रमौ अंघ्रिणीनां नमसे वो मौ गुणौ प्रथममध्यमौ ३९ विदितं तत्समानं च तेन मे भुवनत्रयं अप्रकामोपपन्नेते
६० नैवेसाधोर्हृदयमनसा ४० कार्येषु चैककार्यं चाद्य मर्त्यो स्मि नवजिह्मगा स्वयमेव हि कान्तो गेनः सरिष्यत्प्रतिपद्यते ४१ स्वामिधाम
परिहृतः कामं चक्रसतेन मे स्थापितो दशमो मूर्द्धि लव्यं गाङ्गवरद्वसा ४२ सर्वदुर्वर्णाति सर्गान्तु मयातस्वदुरात्मनः अत्याहत्य
पोः सद्यं वन्द्यनेनैव भोगिनः ४३ धातारं तपसाप्रीतेयया चेसतिराक्षसः दैवात्सर्गाद्दवध्यान्त्वं मर्त्यैद्या स्यापराङ्मुखकः ४४ सोहं
दाशरथिर्भूत्वा रणभूमेर्वलिर्द्वामम् करिष्यामि शरैस्तीक्ष्णैस्तस्तछिरः कामलेोऽयम् ४५ अचिराद्यज्वभिर्भागं कल्पितं विधिवत्पुनः
मायातवमिरऽनालाटमादास्मद्ध्वेनिशाचरैः ४६ वैमानिकाः पुण्यकृतस्त्यजन्तु मरुतांपथि पुष्पकालोकसंक्षोभं मे घावरणान्त ६०
२०

© Dharmartha Trust J&K. Digitized by eGangotri

त्मराः ४७ मोक्षध्वेसुरवंदीनां वेणीर्विधानदूषितान् शाययंधितपोलक्ष्मवलात्कारकचग्रहैः रावणावग्रहक्लांतमितिवागमृतेनसः
अभिवृष्यमरुत्सस्यंकृष्णमेघस्तिरोदधे ४९ पुरुहूतप्रभृतयः सुरकार्योद्यतसुराः अंशैरनुययुर्विष्णुंपुष्पैर्वायुमिवद्रुमाः ५०
अथतस्यविशांपत्युरंतेकाम्यस्यकर्मणः पुरुषःप्रबभूवाग्नेर्विस्मयेनसहर्त्विजां ५१ हेमपात्रीकृतंदोर्भ्यामादधानःपयश्चरुं अ
नुप्रवेशादाद्यस्यपुंसस्तेनापिदुर्वहम् ५२ प्राजापत्योपनीतंतदन्नंप्रत्यग्रहीन्नृप वृषेवपयसांसारमाविष्कृतमुदन्वता
५३ अनेनकथिताराज्ञोगुणास्तस्यान्यदुर्लभाः प्रसूतिंचकमेतास्मिंस्त्रैलोक्यप्रभवोपियत् ५४ सतेजोवैष्णवंपत्न्योर्विभे
जेचरुसंज्ञितम् द्यावापृथिव्योःप्रत्यग्रमहर्पतिरिवातप ५५ अर्चितातस्यकौशल्याप्रियाकेकयवंशजा अतःसंभावितांता

© Dharmartha Trust J&K. Digitized by eGangotri

की वा

८८ भ्यां सुमित्रामैच्छदीश्वरः ५६ ते च कुक्ष्यपि विनम्रे पत्न्यावापत्य महीक्षितः चरोरर्द्धार्द्धभागाभ्यां तामयोजयतामुभे ५७ सा हि प्रणयवत्यास
न० सीत्सपत्न्योरुभयोरपि भ्रमरी वारणस्येव मदनिःस्यन्दलेखयोः ५८ ताभिर्गर्भः प्रजाभूत्यै दध्रे देवांशसंभवः सौरीभिरिव नाडीभिरमृता
ख्याभिरम्मयः ५९ सममापन्नसत्वास्ता रेजुरापाण्डुरत्विषः अन्तर्गतफलारम्भाः सस्यानामिव संपदः ६० गुप्तं ददृशुरात्मानं सर्वाः स्व
प्नेषु वामनैः जलजासिगदाशार्ङ्गचक्रलाञ्छितमूर्त्तिभिः हेमपक्षप्रभाजालं गगने च वितन्वता उह्यन्ते स्म सुपर्णेन वेगाकृष्टपयोमुचा ६२
बिभ्रत्या कौस्तुभन्यासं स्तनान्तरविलम्बिनं पर्युपास्यन्त लक्ष्म्या च पद्मव्यजनहस्तया ६३ कृताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्तभिः ब्रह्म ८१
र्षिभिः परं ब्रह्म गृणद्भिरुपतस्थिरे ६४ ताभ्यस्तथाविधान्स्वप्नाञ्छ्रुत्वा प्रीतो हि पार्थिवः मेने परार्द्ध्यमात्मानं गुरुत्वेन जगद्गुरोः २..

© Dharmartha Trust J&K. Digitized by eGangotri